3

— [illegible] ॥ —

— శ్రీ సప్తశతీ స్తోత్ర ॥ —

స్వామి దీక్షిత బాలకృష్ణ శాస్త్రి

॥ अथसप्तश्लोति प्रारंभः ॥ मतालक्ष्मा प्रसंन ॥

॥ [illegible] ीकर त्याचे असे ॥

॥ शाके १७३७ संवत् १८७२ माघम सः ॥

॥दुर्गा०॥
॥१॥

श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ ॐ नमश्चंडिकायै
नमः॥ मार्कंडेय उवाच॥ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणां॥ यन्न कस्य
चिदाख्यातं तन्मे ब्रूहि पितामह॥१॥ ब्रह्मोवाच॥ अस्ति गुह्यतमं विप्र सर्वभू
तोपकारकं॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने॥२॥ प्रथमं शैलपुत्री च
द्वितीयं ब्रह्मचारिणी॥ तृतीयं चंद्रघंटेति कूष्मांडेति चतुर्थकं॥३॥ पंचमं स्कं
दमातेति षष्ठं कात्यायनीति च॥ सप्तमं कालरात्री च महागौरीति चाष्टमं॥
४॥ दुर्गेति नवमं नाम नवदुर्गाः प्रकीर्तिताः॥ उक्तान्येतानि नामानि ब्रह्मणैव
महात्मना॥५॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे॥ विषमे दुर्गमे चैव भया
र्ताः शरणं गताः॥६॥ न तेषां जायते किंचिदशुभं रणसंकटे॥ नापदं तस्य प

सिद्धिदाः प्रोक्ता

श्यामि शोकदुःखभयं न हि॥७॥ यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते॥ प्रे
तसंस्था तु चामुंडा वाराही महिषासना॥८॥ ऐंद्री गजसमारूढा वैष्णवी गरु
डासना॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना॥९॥ ब्राह्मी हंससमारू
ढा सर्वाभरणभूषिता॥ लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया॥१०॥ श्वे
तरूपधरा देवी ईश्वरी वृषवाहना॥ इत्येता मातरः सर्वाः सर्वयोगसमन्वि
ताः॥११॥ नानाभरणशोभाढ्या नानामाल्यविभूषिताः॥ श्रेष्ठैश्च मौक्तिकैः स
र्वा दिव्यहारप्रलंबिभिः॥१२॥ इंद्रनीलैर्महानीलैः पद्मरागैः सुशोभनैः॥ दृ
श्यंते रथमारूढा देव्यः क्रोधसमाकुलाः॥१४॥ शंखं चक्रं गदां शक्तिं हलं च मु
सलायुधं॥ खेटकं तोमरं चैव परशुं पाशमेव च॥१५॥ कुंतायुधं त्रिशूलं च शा
र्ङ्गमायुधमुत्तमं॥ दैत्यानां देहनाशाय भक्तानामभयाय च॥१६॥ धारयंत्या

॥दुर्गा०॥
॥२॥

युधानिस्त्वंदेवानांचहितायवै॥ नमस्तेस्तु महारौद्रेमहाघोरपराक्रमे॥१६॥
महाबलेमहोत्साहेमहाभयविनाशिनी॥त्राहिमांदेविदुःप्रेक्ष्ये शत्रूणां
भयवृर्द्धिनि॥१७॥प्राच्यांरक्षतुमामैंद्रीआग्नेयामग्निदेवता॥दक्षिणेरक्षवा
राहीनैर्ऋत्यांखड्गधारिणि॥१८॥प्रतीच्यांवारुणीरक्षद्वायव्यांमृगवाहनी
उदीच्यांरक्षकौबेरीईशान्यांशूलधारिणी॥१९॥ऊर्ध्वंब्रह्माणीमेरक्षेदध
स्ताद्वैष्णवीतथा॥एवंदशदिशोरक्षेचामुंडाशववाहना॥२०॥जयामेचा
ग्रतःस्यातुविजयास्यातुपृष्ठतः॥अजितावामपार्श्वेतुदक्षिणेचापरा
जिता॥२१॥शिखांमेद्योतिनीरक्षेदुमामूर्द्ध्निव्यवस्थिता॥मालाधरीललाटे
चभ्रुवोरक्षेद्यशस्विनी॥२३॥त्रिनेत्राचभ्रुवोर्मध्येयमघंटाचनासिके॥शं
खिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी॥२४॥कपोलौकालिकारक्षेत्कर्ण

॥राम॥
॥२॥

मूलेचशांकरी॥नासिकायांसुगंधाचउत्तरोष्ठेचचर्चिका॥२५॥अधरेचामृत
कलाजिह्वायांचसरस्वती॥दंतान्रक्षतुकौमारीकंठमध्येचचंडिका॥२६॥
घंटिकांचित्रघंटाचमहामायाचतालुके॥कामाक्षीचुबुकंरक्षेद्वाचंमेसर्व
मंगला॥२७॥ग्रीवायांभद्रकालीचपृष्ठवंशेधनुर्धरी॥नीलग्रीवावहिः
कंठेनलिकांनलकूबरी॥२८॥खड्गधारिण्युभौस्कंधौबाहूमेवज्रधारिणी॥
हस्तयोर्दंडिनीरक्षेदंबिकाचांगुलीस्तथा॥२९॥नखांछूलेश्वरीरक्षेत्कुक्षौर
क्षेन्नलेश्वरी॥स्तनौरक्षेन्महादेवीमनःशोकविनाशिनी॥३०॥हृदयेललि
तादेवीउदरेशूलधारिणी॥नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा॥३१॥
भूतनाथकामेढ्रंचऊरूमेमेघवाहनी॥कट्यांभगवतीपातुजानुनीविंध्य
वासिनी॥३२॥जंघेमहाबलाप्रोक्तासर्वकामप्रदायिनी॥पादांगुलीः

जानुनीविंध्यवासिनी॥गुल्फयोर्नारसिंहीचपादपृष्ठेमितौजसी१

श्रीधरी च तलं पातालवासिनी ॥३३॥ दंष्ट्राः करालिनी रक्षेत्केशांश्चैवोर्ध्व
केशिनी ॥ रोमकूपाणि कौवेरी त्वचं वागीश्वरी तथा ॥३४॥ रक्तमज्जावसामां
सान्यस्थिमेदांसि पार्वती ॥ अंत्राणी कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३५
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ज्वालामुखी नखज्वालामभे
द्या सर्वसंधिषु ॥३६॥ शुक्रं ब्रह्माणि मे रक्षेत् छायां छत्रेश्वरी तथा ॥ अहंकारं
मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३७॥ प्राणापानौ तथा व्यानमुदानं च समा
नकं ॥ वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३८॥ रसे रूपे च गंधे च
शब्दे स्पर्शे च योगिनी ॥ सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३९॥ आयु
र्मे रक्षवाराही धर्मं रक्षतु वैष्णवी ॥ यशः कीर्त्तिं च लक्ष्मीं च सदा रक्षंतु मान
रः ॥४०॥ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडिके ॥ पुत्रान् रक्षेन्महाल

राजद्वारे महालक्ष्मीः संग्रामे जयवर्द्धिनी

क्ष्मीर्भार्यां रक्षतु भैरवी ॥ धनेश्वरी धनं रक्षेत्कौमारी कन्यकास्तथा ॥४१॥
मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता ॥ सर्वरक्षाकरं पुण्यं कवचं सर्व
दा जपेत् ॥४२॥ इदं रहस्यं विप्रर्षे भक्त्या तव मयोदितं ॥ रक्षाहीनं तु यत्स्था
नं वर्जितं कवचेन तु ॥४३॥ तत्सर्वं रक्ष मे देवि दुर्गे दुर्गेऽघहारिणि ॥ पदमे
कं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥४४॥ कवचेनावृतो नित्यं यत्र यत्रैव गच्छ
ति ॥ तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः ॥४५॥ यं यं चिंतयते कामं तं तं
माप्नोति लीलया ॥ परमैश्वर्यमतुलं प्राप्नोति विपुलं पुमान् ॥४६॥ निर्भ
यो जायते मर्त्यः संग्रामेष्वपराजितः ॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृ
तः पुमान् ॥४७॥ इदं तु देव्याः कवचं देवानामपि दुर्लभं ॥ यः पठेत्प्रयतो नित्यं
त्रिसंध्यं श्रद्धयान्वितः ॥४८॥ देवी कला भवेत्तस्य त्रैलोक्ये चापराजितः ॥ जी

॥ दुर्गा० ॥
॥ ४ ॥

वेदूर्षशतंसाग्रम पमृत्युविवर्जितः ॥४८॥ नश्यंतिव्याधयः सर्वेलूतावि
स्फोटकादयः ॥ स्थावरंजंगमंचैवकृत्रिमंचै वपहिद्विषं ॥५०॥ अभिचा
राणिसर्वाणिमंत्रयंत्राणिभूतले ॥ भूचराःखेचराश्चैवकुलजाश्चोपदेशिकाः ५१
सहजाकुलजामालाडाकिनीशाकिनीतथा ॥ अंतरिक्षचराघोराडाकिन्यश्चम
हाबलाः ॥५२॥ ग्रहभूतपिशाचाश्चयक्षगंधर्वराक्षसाः ॥ ब्रह्मराक्षसवेतालाः
कूष्मंडाभैरवादयः ॥५३॥ नश्यंतिदर्शनात्तस्यकवचेहृदिसंस्थिते ॥ मानोन्न
तिर्भवेद्राज्ञस्तेजोवृद्धिःकरंभवेत ॥५४॥ यशसेवृद्धिमेवेत्तस्यकीर्त्तिर्वृद्धिश्चजा
यते ॥ तस्माज्जपेत्सदाभक्ताकवचंकामदंमुने ॥५५॥ जपेत्सप्तशतींचंडी
कृत्वाकवचमादितः ॥ निर्विघ्नेनभवेत्सिद्धिश्चंडीजपसमुद्भवात ॥५६॥
यावद्भूमंडलंधत्तेसशैलवनकाननं ॥ तावत्तिष्ठतिमेदिन्यांसंततिःपुत्र

॥ राम ॥
॥ ४ ॥

पौत्रिकी ॥५७॥ देहांतेपरमंस्थानंयत्सुरैरपिदुर्लभं ॥ प्राप्नोतिपुरुषोनित्यंम
हामायाप्रसादतः ॥५८॥ लभतेपरमंरूपंशिवेनसमतांव्रजेत ॥ तत्सदंसमवा
प्नोतियावदाभूतसंप्लवं ॥५९॥ इतिश्रीहरिहरब्रह्म विरचितंदेव्याःकवचं
संपूर्णं ॥ श्रीं ॐ नमश्चंडिकायैनमः ॥ ऋषिरुवाच ॥ जयंतीमंगलाकालीभ
द्रकालीकपालिनी ॥ दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते ॥१॥ म
धुकैटभविद्राविविधात्रिवरदेनमः ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥२॥
महिषासुरनिर्नाशिविधात्रिवरदेनमः ॥ रूपं० ॥३॥ रक्तबीजवधेदेविचंडमु
डविनाशिनि ॥ रूपं० ॥४॥ शुंभस्यैवनिशुंभस्यधूम्राक्षस्यचमर्दिनि ॥ रूपं० ॥५॥
वंदितांघ्रियुगेदेविदेविसौभाग्यदायिनी ॥ रूपं० ॥६॥ अचिंत्यरूपचरितेस
र्वशत्रुविनाशिनि ॥ रूपं० ॥७॥ नतेभ्यःसर्वदाभक्त्याचंडिकेदुरितापहे ॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनी ॥ रूपं० ॥ ९

दुर्गा० ५

रूपं ८ ॥ चंडिके सततं ये त्वामर्चयंतीह भक्तितः रूपं० ॥ १० ॥ देहि सौभाग्यमारो
ग्यं देवि देहि परं सुखं ॥ रूपं ॥ ११ ॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं
रूपं ॥ १२ ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥ रूपं० ॥ १३ ॥ सुरासुरशिरो
रत्ननिघृष्टचरणांबुजे ॥ रूपं० ॥ १४ ॥ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कु
रु ॥ रूपं० ॥ १५ ॥ प्रचंडदैत्यदर्प्पघ्ने चंडिके प्रणतायमे ॥ रूपं० ॥ १६ ॥ चतुर्भु
जे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपं० ॥ १७ ॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या स
दांबिके रूपं ॥ १८ ॥ हिमाचलसुतानाथसंस्तुते परमेश्वरि ॥ रूपं० ॥ १९ ॥ इं
द्राणीपतिसद्भावपूजिते परमेश्वरि ॥ रूपं० ॥ २० ॥ देवि प्रचंडदोर्दंडदैत्यद
र्पविनाशिनि रूपं० ॥ २१ ॥ देवि भक्तजनोद्दामदत्तानंदोदयेंबिके रूपं० ॥
२२ ॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं ॥ तारिणीं दुर्गसंसारसाग

राम ॥ ५ ॥

संत्राय

रस्य कुलोद्भवां ॥ २३ ॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ सतु सप्तशती
संख्यावरमाप्नोति संपदः ॥ २४ ॥ इत्यर्गलास्तुतिः ॥ ऋषिरुवाच ॥ विशुद्धज्ञा
नदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे
१ ॥ सर्वमेतद्विजानीयान्मंत्राणामभिकीलकं सोपि क्षेममवाप्नोति सततं जा
प्यतत्परः ॥ २ ॥ सिद्ध्यंत्युच्चाटनादीनि वस्तूनि सकलान्यपि एतेन स्तुवतां देवी
स्तोत्रमंत्रेण सिद्धिदा ॥ ३ ॥ न मंत्रो नौषधं तत्र न किंचिदपि विद्यते विना जा
प्येन सिध्येत सर्वमुच्चाटनादिकं ॥ ४ ॥ समस्तान्यपि सिध्यंति लोकशंका
मिमां हरः ॥ कृत्वा निमंत्रयामास सर्वमेवमिदं शुभं ॥ ५ ॥ स्तोत्रं वै चंडि
कायास्तु तच्च गुह्यं चकार सः ॥ समाप्नोति सुपुण्येन तां यथावन्निमंत्र
णां ॥ ६ ॥ सोपि क्षेममवाप्नोति सर्वमेव न संशयः ॥ कृष्णायां वा चतुर्दश्यां

दु॰गा॰ ॥६॥

अष्टम्यांवासमाहितः ॥७॥ ददातिप्रतिगृह्णातिनान्यथैषाप्रसिध्यति ॥ इत्थं
रूपेणकीलेनमहादेवेनकीलितं ॥८॥ यानिःकीलांविधायैनांनित्यंजप
तिसंस्फुटं ॥ ससिद्धःसगणःसोपिगंधर्वोजायतेवने ॥९॥ नचैवाप्यटतस्तस्य
भयंक्वापिहिजायते ॥ नापमृत्युवशंयातिमृतोमोक्षमवाप्नुयात् ॥१०
ज्ञात्वाप्रारभ्यकुर्वीतह्यकुर्वाणोविनश्यति ॥ ततोज्ञात्वैवसंपन्नमिदंप्रा
रभ्यतेबुधैः ॥११॥ सौभाग्यादिचयत्किंचिद्दृश्यतेललनाजनैः ॥ तत्सर्
वंतत्प्रसादेनतेनजाप्यमिदंशुभं ॥१२॥ शनैस्तुजप्यमानेस्मिन्स्तोत्रे
संपत्तिरुच्चकैः ॥ भवत्येवसमग्रापिततःप्रारभ्यमेवतत् ॥१३॥ ऐश्वर्यं
यत्प्रसादेनसौभाग्यारोग्यसंपदः ॥ शत्रुहानिःपरोमोक्षःस्तूयतेसानकिं
जनैः ॥१४॥ इतिदेव्याःकीलकस्तुतिः ॥ ॐ अस्यश्रीसप्तशतीस्तोत्रमा

लामंत्रस्य ॥ मार्कंडेयऋषिः ॥ श्रीमहालक्ष्मीदेवतागायत्र्युष्णिगनु
ष्टुप्छंदांसिभुक्तिमुक्तिसिद्ध्यर्थेजपेविनियोगः ॥ ॐ अस्यप्रथमचरि
त्रस्यब्रह्माऋषिर्गायत्रीछंदः ॥ महाकालीदेवतारक्तदंतिकाबीजंनंदा
शक्तिः ॥ अग्निस्तत्त्वंऋग्वेदमूर्तिर्महाकालीप्रीत्यर्थेप्रथमचरित्रे ज
पेविनियोगः ॥१॥ ॐ अस्यमध्यमचरित्रस्यविष्णुऋषिरुष्णिक्छंदःम
हालक्ष्मीर्देवता ॥ दुर्गाबीजंशाकंभरीशक्तिः ॥ वायुस्तत्त्वंयजुर्वेदमू
र्तिर्महालक्ष्मीप्रीत्यर्थेमध्यमचरित्रे जपेविनियोगः ॥२॥ ॐ अस्य
श्रीउत्तरचरित्रस्यरुद्रऋषिरनुष्टुप्छंदःमहासरस्वतीदेवता ॥ भ्राम
रीबीजं ॥ भीमाशक्तिः ॥ सूर्यस्तत्त्वंसामवेदमूर्तिर्महासरस्वतीप्रीत्यर्थे
उत्तरचरित्रस्यजपेविनियोगः ॥ मार्कंडेयउवाच ॥ सावर्णिःसूर्यत

दुर्गा ७

नयो यो मनुः कथ्यतेष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ १ ॥
महामायानुभावेन यथा मन्वंतराधिपः ॥ स बभूव महाभागः सावर्णि
स्तनयो रवेः ॥ २ ॥ स्वारोचिषेंतरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजा
भूत्समस्ते क्षितिमंडले ॥ ३ ॥ तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौर
सान् ॥ बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ४ ॥ तस्य तैरभवद्यु
द्धमतिप्रबलदंडिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ५ ॥
ततः स्वपुरमायातो निजदेशाधिपो भवत् ॥ आक्रांतः स महाभागस्तै
स्तदा प्रबलारिभिः ॥ ६ ॥ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥ कोशो
बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ७ ॥ ततो मृगयाव्याजेन हृतः स्वाम्यः
स भूपतिः ॥ एकाकी हयमारुह्य जगाम गहनं वनं ॥ ८ ॥ स तत्राश्रममद्राक्षी

ग

कृ

द्द्विजवर्यस्य मेधसः ॥ प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभितं ॥ ९ ॥ त
स्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन्मुनि
वराश्रमे ॥ १० ॥ सोचिंतयत्तदा तत्र ममत्वाकृष्टचेतनः ॥ मत्पूर्वैः पालितं पू
र्वं मया हीनं पुरं हि तत् ॥ ११ ॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ न जाने
स प्रधानो मे शूरहस्ती सदामदः ॥ १२ ॥ मम वैरिवशं यातः कान्भोगानुपल
प्स्यते ये ममानुगता नित्यं प्रसादधनभोजनैः ॥ १३ ॥ अनुवृत्तिं ध्रुवं तेद्य कुर्व
न्त्यन्यमहीभृतां ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं ॥ १४ ॥ संचितः
सोतिदुःखेन क्षयं कोशो गमिष्यति ॥ एतच्चान्यच्च सततं चिंतयामास पा
र्थिवः ॥ १५ ॥ तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन कस्त्वं
भो हेतुश्चागमनेत्र कः ॥ १६ ॥ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥

साकर्ण्यवचस्तस्य भूपतेः प्रणयोदितं ॥१७॥ प्रत्युवाच स तं वैश्यः प्रश्रयाव
नतोनृपं ॥ समाधिर्नामवैश्योहमुत्पन्नो धनिनांकुले ॥ पुत्रदारैर्निरस्तश्च
धनलोभादसाधुभिः ॥१८॥ विहीनः स्वजनैर्दारैः पुत्रैरादायमेधनं ॥ वन
मभ्यागतोदुःखी निरस्तश्चाप्तबंधुभिः ॥१९॥ सोहंनवेद्मिपुत्राणांकुश
लाकुशलात्मिकां ॥ प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थितः ॥२०॥ किं
नुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं ॥ कथंतेकिंनुसद्वृत्ता दुर्वृत्ताः किंनुमे
सुताः ॥२१॥ राजोवाच ॥ यैर्निरस्तोभवांल्लुब्धैः पुत्रदारादिभिर्धनैः तेषुकिं
भवतःस्नेहमनुबध्नातिमानसं ॥२२॥ वैश्यउवाच ॥ एवमेतद्यथाप्राहभ
वानस्मद्गतंवचः ॥ किंकरोमिनबध्नातिममनिष्ठुरतांमनः ॥२३॥ यैःसंस
ज्यपितृस्नेहंधनलुब्धैर्निराकृतः ॥ पतिस्वजनहार्दंचहार्दितेष्वेवमेमनः ॥२४॥

किमेतन्नाभिजानामिजानन्नपिमहामते ॥ यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबं
धुषु ॥२५॥ तेषांकृतेमेनिश्वासोदौर्मनस्यंचजायते ॥ करोमिकिंयन्नमनस्ते
ष्वप्रीतिषुनिष्ठुरं ॥२६॥ मार्कंडेयउवाच ॥ ततस्तौसहितौविप्रतंमुनिंसमुप
स्थितौ ॥ समाधिर्नामवैश्योसौसचपार्थिवसत्तमः ॥ कृत्वातुतौयथान्या
य्यंयथार्हंतेनसंविदं ॥ उपविष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ रा
जोवाच ॥ भगवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्वतत् ॥ दुःखाययन्मेमनसः
स्वचित्तायत्ततांविना ॥२७॥ ममत्वम [illegible] राज्यस्यराज्यांगेष्वखिलेष्वपि ॥ जानतो
पियथाज्ञस्यकिमेतन्मुनिसत्तम ॥२८॥ अयंचनिःकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झि
तः ॥ स्वजनेनचसंत्यक्तस्तेषुहार्दीतथाप्यति ॥३१॥ एवमेवतथाहंच
द्वावप्यत्यंतदुःखितौ ॥ दृष्टदोषेपिविषयेममत्वाकृष्टमानसौ ॥३२॥ त

॥दुर्गा·॥
॥९॥

किमेतन्महाभागयन्मोहोज्ञानिनोरपि ॥ ममास्यचभवत्येषाविवेकांध
स्यमूढता ॥ ३३ ॥ ऋषिरुवाच ॥ ज्ञानमस्तिसमस्तस्यजंतोर्विषयगोचरे ॥
विषयश्चमहाभागयांतिचैवंपृथक्पृथक् ॥ ३४ ॥ दिवांधाःप्राणिनःके
चिद्रात्रावंधास्तथापरे ॥ केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ॥ ३५
ज्ञानिनोमनुजाःसत्यंकिंतुतेनहिकेवलं ॥ यतोहिज्ञानिनःसर्वेपशुपक्षि
मृगादयः ॥ ३६ ॥ ज्ञानंचतंमनुष्याणांयत्तेषांमृगपक्षिणां ॥ मनुष्याणांच
यत्तेषांतुल्यमन्यत्तथोभयोः ॥ ३७ ॥ ज्ञानेपिसतिपश्यैतान्पतंगान्शाव
चंचुषु ॥ कणमोक्षादृतान्मोहात्पीड्यमानानपिक्षुधा ॥ ३८ ॥ मानुषामनु
जव्याघ्रसाभिलाषाःसुतान्प्रति ॥ लोभात्प्रत्युपकारायनन्वेतान्किं
नपश्यति ॥ ३९ ॥ तथापिममतावर्त्तेमोहगर्त्तेनिपातिताः ॥ महामायाप्र

भावेणसंसारस्थितिकारिणः ॥ ४० ॥ तन्नात्रविस्मयःकार्योयोगनिद्राजगत्प
तेः ॥ महामायाहरेश्चैसतयासंमोह्यतेजगत् ॥ ४१ ॥ ज्ञानिनामपिचेतांसिदेवी
भगवतीहिसाबलादाकृष्यमोहायमहामायाप्रयच्छति ॥ ४२ ॥ तयाविसृ
ज्यतेविश्वंजगदेतच्चराचरं ॥ सैषाप्रसन्नावरदानृणांभवतिमुक्तये ॥ ४३ ॥
साविद्यापरमामुक्तेर्हेतुभूतासनातनी ॥ संसारबंधहेतुश्चसैवसर्वेश्वरे
श्वरी ॥ ४४ ॥ राजोवाच ॥ भगवन्काहिसादेवीमहामायेतियांभवान् ॥ ब्रवी
तिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज ॥ ४५ ॥ यत्स्वभावाचसादेवीयत्स्वरू
पायदुद्भवा ॥ तत्सर्वंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर ॥ ४६ ॥ ऋषिरुवाच
नित्यैवसाजगन्मूर्तिस्तयासर्वमिदंततं ॥ तथापितत्समुत्पत्तिर्बहुधाश्रूयतां
मम ॥ ४७ ॥ देवानांकार्यसिद्ध्यर्थमाविर्भवतिसायदा ॥ उत्पन्नेतितदालोके

७ प्रभुः

॥दुर्गा॥ ॥१०॥

सानिसाप्यभिधीयते ॥४८॥ योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते ॥ आस्ती
र्यशेषमभजत्कल्पांतेभगवान्प्रभुः ॥४९॥ तदाद्वावसुरौघोरौविख्यातौमधुकै
टभौ ॥ विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ ॥५०॥ सनाभिकमलेविष्णोः
स्थितोब्रह्माप्रजापतिः ॥ दृष्ट्वातावसुरौचोग्रौप्रसुप्तंजनार्दनं ॥५१॥ तुष्टाव
योगनिद्रांतामेकाग्रहृदयस्थितः ॥ विबोधनार्थायहरेर्हरिनेत्रकृतालयां
॥५२॥ ब्रह्मोवाच ॥ विश्वेश्वरींजगद्धात्रींस्थितिसंहारकारिणीं ॥ [illegible] निद्रां
भगवतींविष्णोरतुलांतेजसः ॥५३॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारस्वरात्मि
का ॥ सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता ॥५४॥ अर्धमात्रास्थितानि
त्यायानुच्चार्याविशेषतः ॥ त्वमेवसात्वंसावित्रीत्वंदेवीजननीपरा ॥५५॥
त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत् ॥ त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेच

सर्वदा ॥५६॥ विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने ॥ तथासंहृतिरूपांतेजग
तोस्यजगन्मये ॥५७॥ महाविद्यामहामायामहामेधामहास्मृतिः ॥ महामोहा
चभगवतीमहादेवीमहासुरी ॥५८॥ प्रकृतिस्त्वंचसर्वस्यगुणत्रयविभाविनी
कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ॥५९॥ त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वं
बुद्धिर्बोधलक्षणा ॥ लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षांतिरेवच ॥६०॥ खड्गि
नीशूलिनीघोरागदिनीचक्रिणीतथा ॥ शंखिनीचापिनीबाणभुशुंडीपरि
घायुधा ॥६१॥ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणांप
रमात्वमेवपरमेश्वरी ॥६२॥ यच्च किंचित्क्वचिद्वस्तुसदसद्वाखिलात्मि
के ॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेमया ॥६३॥ ययात्वयाजगत्स्रष्टा
जगत्पात्यत्तियोजगत् ॥ सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः

विष्णुः शरीरग्रहणमहमीशान एव च । कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्ति
मान्भवेत् ॥ ६५ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता । मोहयैतौ दुराधर्षा
वसुरौ मधुकैटभौ ॥ ६६ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोध
श्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ ६७ ॥ ऋषिरुवाच ॥ एवं स्तुता तदा दे
वी तामसी तत्र वेधसा ॥ विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥ ६८ ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणो
ऽव्यक्तजन्मनः ॥ ६९ ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ ए
कार्णवेऽहिशयनात्ततः स ददृशे च तौ ॥ ७० ॥ मधुकैटभौ दुरात्मानाव
तिवीर्यपराक्रमौ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥ ७१ ॥ स
मुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः ॥ पंचवर्षसहस्राणि बाहु

प्रहरणो विभुः ॥ ७२ ॥ युध्यमानावतिबलोद्दृष्टौ तावसुरोत्तमौ ॥ निजविघ्नं
समालोक्य समुद्भूतमहोत्सवः ॥ ७३ ॥ उवाच मत्तो व्रियतां वरो वा योऽभि
वाञ्छितः ॥ विहस्य तेत विभो केशवौ मवलोक्य परस्परं ॥ ७४ ॥ तावप्यति
बलोन्मत्तौ महामायाविमोहितौ ॥ उक्तवन्तौ वरोऽस्मत्तो व्रीयतामिति
केशवं ॥ ७५ ॥ श्रीभगवानुवाच ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभा
वपि ॥ किमन्येन वरेणात्र एतावद्धि वृतं मम ॥ ७६ ॥ ऋषिरुवाच ॥ वंचि
ताभ्यामिति तदा सर्वमायोमयं जगत् ॥ विलोक्य ताभ्यां गदितो भग
वान्कमलेक्षणः ॥ ७७ ॥ प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ॥
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ ७८ ॥ ऋषिरुवाच ॥ तथे
त्युक्त्वा भगवता शंखचक्रगदाभृता ॥ कृत्वा चक्रेण वै छिन्ने जघने

शिरसीतयोः ७९ एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयं ॥ प्रभावम-
स्यादेव्यास्तुभूयःशृणुवदामिते ॥ ८० ॥ इतिमार्कंडेयपुराणेसावर्णि-
केमन्वंतरेदेवीमाहात्म्येमधुकैटभवधः ॥ १ ॥ ऋषिरुवाच ॥ देवासुर-
मभूद्युद्धंपूर्णमब्दशतंपुरा महिषेसुराणामधिपेदेवानांचपुरंदरे १
तत्रासुरैर्महावीर्यैर्देवसैन्यंपराजितं ॥ जित्वाचसकलान्देवानिंद्रो-
भून्महिषासुरः ॥ २ ॥ ततःपराजितादेवाःपद्मयोनिंप्रजापतिं ॥ पुरस्कृ-
त्यगतास्तत्रयत्रेशगरुडध्वजौ ॥ ३ ॥ यथावृत्तंतयोस्तद्वन्महिषासुर-
चेष्टितं ॥ त्रिदशाःकथयामासुर्देवाभिभवविस्तरं ॥ ४ ॥ सूर्येंद्राग्न्यनिलें-
दूनांयमस्यवरुणस्यच ॥ अन्येषांचाधिकारान्सस्वयमेवाधितिष्ठति
५ ॥ स्वर्गान्निराकृताःसर्वेतेनदेवगणाभुवि ॥ विचरंतियथामर्त्यामहिषेण

दुरात्मना ६ ॥ एतद्वःकथितंसर्वममरारिविचेष्टितं । शरणंवःप्रपन्ना-
स्मोवधस्तस्यविचिंत्यतां ७ ॥ ऋषिरुवाच ॥ इत्थंनिशम्यदेवानांव-
चांसिमधुसूदनः ॥ चकारकोपंशंभुश्चभ्रुकुटीकुटिलाननौ ॥ ८ ॥ ततोति-
कोपपूर्णस्यचक्रिणोवदनात्ततः ॥ निश्चक्राममहत्तेजोब्रह्मणःशंकर-
स्यच ९ ॥ अन्येषांचैवदेवानांशक्रादीनांशरीरतः ॥ निर्गतंसुमहत्तेजस्त-
च्चैक्यंसमगच्छत ॥ १० ॥ अतीवतेजसःकूटंज्वलंतमिवपर्वतं ॥ ददृशुस्तेसु-
रास्तत्रज्वालाव्याप्तदिगंतरं ॥ ११ ॥ अतुलंतत्रतत्तेजःसर्वदेवशरीरजं ॥ ए-
कस्थंतदभून्नारीव्याप्तलोकत्रयंत्विषा ॥ १२ ॥ यदभूच्छांभवंतेजस्तेनाजा-
यततन्मुखं ॥ याम्येनचाभवन्केशाबाहवोविष्णुतेजसा ॥ १३ ॥ सौम्येन
स्तनयोर्युग्मंमध्यंचैंद्रेणचाभवत् ॥ वारुणेनचजंघोरूनितंबस्तेज

स्यस्तु वः॥१४॥ ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा। वसूनां च करांगु
ल्यः कौबेरेण च नासिका॥१५॥ तस्यास्तु दंताः संभूताः प्राजापत्येन ते
जसा॥ नयनत्रितयं जज्ञे तथा पावकतेजसा॥१६॥ भ्रुवौ च संध्ययो
स्तेजः श्रवणावनिलस्य च॥ अन्येषां चैव देवानां संभवस्तेजसां शिवा॥१७
॥ ततः समस्तदेवानां तेजोराशिसमुद्भवां॥ तां विलोक्य मुदं प्रापुरमरा
महिषार्दिताः॥१८॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्॥ च
क्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः॥१९॥ शंखं च वरुणः शक्तिं ददौ
तस्यै हुताशनः॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी॥२०॥ वज्रम
िंद्रः समुत्पाद्य कुलिशादमराधिपः॥ ददौ तस्यै सहस्राक्षो घंटामै
रावताद्गजात॥२१॥ कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ॥ प्रजापति

२८

श्चाक्षमालां ददौ ब्रह्मा कमंडलुं॥२२॥ समस्तरोमकूपेषु निजरश्मीन् दिवा
करः। कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलं॥ क्षीरोदश्चामलं हार
मजरे च तथांबरे॥ चूडामणिं तथा दिव्यं कुंडले कटकानि च॥२४॥ अर्द्ध
चंद्रं तथा शुभ्रं केयूरान् सर्वबाहुषु॥ नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्त
मं॥२५॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च॥ विश्वकर्मा ददौ तस्यै
परशुं चातिनिर्मलं॥२६॥ अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं॥
अम्लानपंकजां मालां शिरस्युरसि चापरां॥२७॥ अददज्जलधिस्तस्यै पं
कजं चातिशोभनं॥ हिमवान्वाहनं सिंहं रत्नानि विविधानि च॥२८॥ ददा
वशून्यं सुरया पानपात्रं धनाधिपः॥ शेषश्च सर्वनागेशो महामणिवि
भूषितं॥२९॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां॥ अन्यैरपि सुरैर्दे

येभूषणैरायुधैस्तथा॥ सम्मानिताननादोच्चैः साट्टहासंमुहुर्मुहुः ॥२९
तस्यानादेनघोरेणकृत्स्नमापूरितंनभः॥ अमायतातिमहता प्रतिश
ब्दोमहानभूत॥३०॥चुक्षुभुःसकलालोकाःसमुद्राश्चचकंपिरे चचा
लवसुधाचेलुःसकलाश्चमहीधराः॥३१॥जयेतिदेवाश्चमुदातामुचुः
सिंहवाहिनी॥तुष्टुवुर्मुनयश्चैनांभक्तिनम्रात्ममूर्तयः॥३२ दृष्ट्वास
मस्तंसंक्षुब्धंत्रैलोक्यममरारयः॥संनद्धाखिलसैन्यास्तेसमुत्तस्थुरु
दायुधाः॥३३॥आःकिमेतदितिक्रोधादाभाष्यमहिषासुरः॥अभ्य
धावततंशब्दमशेषैरसुरैर्वृतः॥३४॥सददर्शततोदेवींव्याप्तलोकत्र
यांत्विषा॥पादाक्रांत्यानतभुवंकीरीटोल्लिखिताबरा॥३५॥क्षोभिता
शेषपातालंधनुर्ज्यानिःस्वनेनतां॥दिशोभुजसहस्रेणसमंता॥

व्याप्यसंस्थितां॥३६॥ततःप्रववृतेयुद्धंतयादेव्यासुरद्विषां॥शस्त्रास्त्रैर्ब
हुधामुक्तैरादीपितदिगंतरं॥३७॥महिषासुरसेनानीश्चिक्षुराख्योम
हासुरः॥युयुधेचामरश्चान्यैश्चतुरंगबलान्वितः॥३८॥रथानामयुतैः
षड्भिरुदग्राख्योमहासुरः॥अयुध्यतायुतानांचसहस्रेणमहाहनुः
४०॥पंचाशद्भिश्चनियुतैरसिलोमामहासुरः॥अयुतानांशतैःषड्भि
र्बाष्कलोयुयुधेरणे॥४१॥गजवाजिसहस्रौघैरनेकैःपरिवारितः
वृतोरथानांकोट्याचयुद्धेतस्मिन्नयुध्यत॥४२॥वृतःकालोरथानां
चरणेपंचशतायुतैः॥युयुधेचासुरैस्तत्रतावद्भिःपरिवारितः॥वि
डालाख्योयुतानांचपंचाशद्भीरथायुतैः॥युयुधेसंयुगेतत्ररथानां
परिवारितः॥४३॥अन्येचतत्रायुतशोरथनागहयैर्वृताः॥युयुधुः

दुर्गा०
॥२५॥

संयुगे देव्या सह तत्र महासुरः ॥४४॥ कोटिकोटिसहस्रैस्तु रथानां दंति
नां तथा ॥ हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥४५॥ तोमरैर्भिंदि
पालैश्च शक्तिभिर्मुशलैस्तथा ॥ युयुधुः संयुगे देव्या खड्गैः परशु
पट्टिशैः ॥४६॥ केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ देवीं
खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः ॥४७॥ सापि देवी ततस्तानि शस्त्रा
ण्यस्त्राणि चंडिका ॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥४८॥
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ मुमोचासुरदेहेषु श
स्त्राण्यस्त्राणि चेश्वरी ॥४९॥ सोपि क्रुद्धो धुतसटो देव्या वाहनकेस
री ॥ चचारासुरसैन्येषु वनेष्विव हुताशनः ॥५०॥ निःश्वासान्मुमुचे
यांश्च युध्यमाना रणेंबिका ॥ त एव सद्यः संभूता गणाः शतसहस्र

शः ॥५१॥ युयुधुस्ते परशुभिर्भिंदिपालासिपट्टिशैः ॥ नाशयंतोसुर
गणान्देवीशक्त्युपबृंहिताः ॥५२॥ अवादयंत पटहान्गणाः शंखां
स्तथापरे ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥५३॥ ततो देवी
त्रिशूलेन गदया शरवृष्टिभिः ॥ खड्गादिभिश्च शतशो निजघान म
हासुरान् ॥५४॥ पातयामास चैवान्यान् घंटास्वनविमोहितान् ॥ अ
सुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥५५॥ केचिद्द्विधा कृतास्
तीक्ष्णैः खड्गपातैस्तथापरे ॥ विपोथिता निपातेन गदया भुवि शे
रते ॥५६॥ वेमुश्च केचिद्रुधिरं मुशलेन भृशं हताः ॥ केचिन्निपतिता
भूमौ भिन्नाः शूलेन वक्षसि ॥५७॥ निरंतराः शरौघेण कृताः केचिद्र
णाजिरे ॥ श्येनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥५८॥ केषां

न्ना रत

॥दुर्गा॰॥
॥१६॥

विह्वाहवः॥छिन्नाभिन्नग्रीवास्तथापरे॥शिरांसिपेतुरन्येषामन्येमध्ये
विदारिताः॥५८॥विच्छिन्नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः॥एकबाहुक्षि
चरणाःकेचिद्देव्याद्विधाकृताः॥६०॥छिन्नेपिचान्येशिरसिपतिताःपु
नरुत्थिताः कबंधायुयुधुर्देव्यागृहीतपरमायुधाः॥६१॥ननृतुश्चाप
रेतत्रयुद्धेतुर्यलयाश्रिताः॥कबंधाश्छिन्नशिरसःखड्गशक्त्यृष्टिपाण
यः॥६२॥तिष्ठतिष्ठेतिभाषंतेदेवीमन्येमहासुराः॥तिष्ठतिष्ठेतिचैवो॥
क्त्वादैत्यायुयुधिरेमृधे॥६३॥पातितैरथनागाश्वैरसुरैश्चवसुंधरा
अगम्यासाभवत्तत्रयत्राभूत्समहारणः॥६४॥शोणितौघामहान
द्यःसद्यस्तत्रविसुस्रुवुः॥मध्येचासुरसैन्यस्यवारणासुरवाजिनां
क्षणेनतन्महासैन्यमसुराणांतथांबिका॥निन्येक्षयंयथावह्नि

स्तृणदारुमहाचयं॥६६॥सचसिंहोमहानादमुत्सृजन्धुतकेसरः॥शरी
रेभ्योमरारीणामसूनिवविचिन्वति॥६७॥देव्यागणैश्चतैस्तत्रकृतंयुद्धं
तथासुरैः॥यथैषांतुतुषुर्देवाःपुष्पवृष्टिमुचोदिवि॥६८॥इतिमार्कं
डेयपुराणेसावर्णिकेमन्वंतरेदेविमाहात्म्येमहिषासुरसैन्यवधः॥
२॥छ॥ऋषिरुवाच॥निहन्यमानंतत्सैन्यमवलोक्यमहासुरः॥से
नानीश्चिक्षुरःकोपाद्ययौयोद्धुमथांबिकां॥१॥सदेवीशरवर्षेणव
वर्षसमरेसुरः॥यथामेरुगिरेःशृंगंतोयवर्षेणतोयदः॥२॥तस्य
छित्वाततोदेवीलीलयैवशरोत्करान्॥जघानतुरगान्बाणैर्यंता
रंचैववाजिनां॥३॥चिच्छेदचधनुःसद्योध्वजंचातिसमुच्छ्रितं॥विव्या
धचैवगात्रेषुछिन्नधन्वानमाशुगैः॥४॥सच्छिन्नधन्वाविरथोहता

दुर्गा॰
१७

श्चोहतसारथिः॥ अभ्यधावत्ततांदेवीं खड्गचर्मधरोसुरः ५ सिंहमाह
त्यखड्गेनतीक्ष्णधारेणमूर्द्धनि ॥ आजघानभुजेसव्येदेवीमप्यतिवेग
वान् ॥ ६ तस्याःखड्गोभुजंप्राप्यपफालन्नृपनंदन ॥ ततोजग्राहशू
लंसकोपादरुणलोचनः ॥ ७ चिक्षेपचततस्तत्तुभद्रकाल्यांमहासु
रः ॥ जाज्वल्यमानंतेजोभीरविबिंबमिवांबरात् ॥ ८ दृष्ट्वातदापत
च्छूलंदेवीशूलममुंचत ॥ तच्छूलंशतधातेननीतंसचमहासुरः ९
हतेतस्मिन्महावीर्येमहिषस्यचमूपतौ ॥ आजगामगजारूढश्चा
मरस्त्रिदशार्दनः ॥ १० सोपिशक्तिंमुमोचाथदेव्यास्तामंबिकाद्रु
तं ॥ हुंकाराभिहतांभूमौपातयामासनिःप्रभां ॥ ११ भग्नांशक्तिंनि
पतितांदृष्ट्वाक्रोधसमन्वितं ॥ चिक्षेपचामरःशूलंबाणैस्तदपि

साच्छिनत् ॥ १२ ततःसिंहसमुत्पत्यगजकुंभांतरेस्थितः ॥ बाहुयुद्धेन
युयुधेतेनोच्चैस्त्रिदशारिणा ॥ १३ युध्यमानौततस्तौतुतस्मान्ना
गान्महींगतौ ॥ युयुधातेतिसंरब्धौप्रहारैरतिदारुणैः ॥ १४ ततोवे
गात्खमुत्पत्यनिपत्यचमृगारिणा ॥ करप्रहारेणशिरश्चामरस्यपृथ
क्कृतं ॥ १५ उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः ॥ दंतमुष्टितलै
श्चैवकरालश्चनिपातितः ॥ १६ देवीक्रुद्धागदापातैश्चूर्णयामास
चोद्धतं ॥ बाष्कलंभिंदिपालेनबाणैस्ताम्रंतथांधकं ॥ १७ उग्रास्य
मुग्रवीर्यंचतथैवचमहाहनुं ॥ त्रिनेत्राचत्रिशूलेनजघानप
रमेश्वरी ॥ १८ बिडालस्यासिनाकायात्पातयामासवैशिरः ॥ दु
र्द्धरंदुर्मुखंचोभौशरैर्निन्येयमक्षयं ॥ १९ एवंसंक्षीयमाणेतुस्व

दुर्गा०

२८

सैन्यं महिषासुरः ॥ माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥ २० कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् ॥ लांगूलताडितांश्चान्यान् शृंगाभ्यां च विदारितान् ॥ २१ ॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च निश्वासपवनेनान्यान् पातयामास भूतले ॥ २२ ॥ निपात्य प्रमथानीकमभ्यधावत सोसुरः ॥ सिंहं हंतुं महादेव्याः कोपं चक्रे ततोम्बिका ॥ २३ ॥ सोपि कोपान्महावीर्यः ॥ खुरक्षुण्णमहीतलः ॥ शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २४ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥ लांगुलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २५ ॥ धुतशृंगविभिन्नाश्च खंडं खंडं ययुर्घनाः ॥ श्वासानिलास्ताः शतशो निपेतुर्नभसोचलाः ॥ २६ ॥ इति क्रोधसमाध्मातमापतंतं महासुरं ॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् ॥ २७ ॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं ॥ तत्याज माहिषं रूपं सोपि बद्धो महामृधे ॥ ततः सिंहोभवत्सद्यो यावत्तस्याम्बिका शिरः ॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥ २८ ॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥ तं खड्गचर्मणा सार्द्धं ततः सोभून्महागजः ॥ २९ ॥ करेण च महासिंहं तं चकर्ष जगर्ज च ॥ कर्षतस्तु करं देवी खड्गेन निरकृंतत ॥ ३० ॥ ततो महासुरो भूयो माहिषं वपुरास्थितः ॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरं ॥ ३१ ॥ ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं ॥ पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३२ ॥ ननर्द चासुरः सोपि बलवीर्यमदोद्धतः ॥ विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ॥ ३३ ॥ सा च तान्प्रहिता

॥दुर्गा०॥
॥१९॥

स्तेनचूर्णयंतीशरोत्करैः॥उवाचतंमदोद्धृतमुखरागाकुलाक्षरं॥३५॥
देव्युवाच॥गर्ज्जगर्ज्जक्षणंमूढमधुयावत्पिबाम्यहं॥मयात्वयिहते
ऽत्रैवगर्जिष्यंत्याशुदेवताः॥३६॥ऋषिरुवाच॥एवमुक्त्वासमुत्पत्य
सारूढातंमहासुरं॥पादेनाक्रम्यकंठेचशूलेनैनमताडयत्॥३७॥त
तःसोपिपदाक्रांतस्तयानिजमुखात्ततः॥अर्द्धनिष्क्रांतएवासीद्देव्या
वीर्येणसंवृतः॥३८॥अर्द्धनिष्क्रांतएवासौयुध्यमानोमहासुरः॥तया
महासिनादेव्याशिरःछित्वानिपातितः॥३९॥ततोहाहाकृतंसर्वंदैत्य
सैन्यंननाशतत्॥प्रहर्षंचपरंजग्मुःसकलादेवतागणाः॥४०॥तुष्टु
वुस्तांसुरादेवींसहदिव्यैर्महर्षिभिः॥जगुर्गंधर्वपतयोननृतुश्चा
प्सरोगणाः॥४१॥इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी

माहात्म्येमहिषासुरवधः॥३॥ऋषिरुवाच॥शक्रादयःसुरगणा
निहतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या॥तांतुष्टुवुःप्रणति
नम्रशिरोधरांसावाग्भिः॥प्रहर्षपुलकोद्गमचारुदेहाः॥देवाऊ०॥
देव्याययाततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमूहमू
र्त्या॥तामंबिकामखिलदेवमहर्षिपूज्यांभक्त्यानताःस्मविधा
तुशुभानिसानः॥२॥यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चन
हिवक्तुमलंबलंच॥साचंडिकाखिलजगत्परिपालनायनाशायचा
शुभभयस्यमतिंकरोतु॥३॥याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीः
पापात्मनांकृतधियांहृदयेषुबुद्धिः॥श्रद्धासतांकुलजनप्रभवस्य
लज्जातांत्वांनताःस्मपरिपालयदेविविश्वं॥४॥किंवर्णयामतवरूप

८

॥दुर्गा.॥
॥२९॥

मचिंसमेतत्किंचातिवीर्यमसुरक्षयकारिभूरि ॥ किंचाहवेषुचरितानि
तवाद्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु ॥५॥ हेतुःसमस्तजगतां
त्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा ॥ सर्वाश्रयाखिल
मिदंजगदंशभूतमव्याकृताहिपरमाप्रकृतिस्त्वमाद्या ॥६॥ यस्याः
समस्तसुरताःसमुदीरणेनतृप्तिंप्रयांतिसकलेषुमखेषुदेवी ॥ स्वा
हासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच
यामुक्तिहेतुरविचिंत्यमहाव्रताचम्यस्यसेसुनियतेंद्रियतत्त्वसा
रैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमा
हिदेवि ॥८॥ शब्दात्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपा
ठवतांचसाम्नां ॥ देवीत्रयीभगवतीभवभावनायवार्त्ताचसर्वजग

तांपरमार्तिहंत्री ॥९॥ मेधासिदेविविदिताखिलशास्त्रसारादुर्गासिदुर्गभ
वसागरनौरसंगा ॥ श्रीःकैटभारिहृदयैककृताधिवासागौरीत्वमेवश
शिमौलिकृतप्रतिष्ठा ॥१०॥ ईषत्सहासममलंपरिपूर्णचंद्रबिंबानुका
रिकनकोत्तमकांतिकांतं ॥ अत्यद्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलो
क्यसहसामहिषासुरेण ॥११॥ दृष्ट्वातुदेविकुपितंभ्रुकुटीकरालमुद्यच्छशां
कसदृशच्छविपन्नसद्यः ॥ प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यते
हिकुपितांतकदर्शनेन ॥१२॥ देविप्रसीदपरमाभवतीभवायसद्योविना
शयसिकोपवतीकुलानि ॥ विज्ञातमेतदधुनैवयदस्तमेतन्नीतंबलंसु
विपुलंमहिषासुरस्य ॥१३॥ तेसंमताजनपदेषुधनानितेषांतेषांयशां
सिनचसीदतिबंधुवर्गः ॥ धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदा

भ्युदयदाभवतीप्रसन्ना ॥१४॥ धर्म्याणिदेविसकलानिसदैवकर्माण्यत्या
दृतःप्रतिदिनंसुकृतीकरोति ॥ स्वर्गंप्रयातिचततोभवतिप्रसादाल्लोकत्र
येपिफलदानतुदेवितेन ॥१५॥ दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैः
स्मृतामतिमतीवशुभांददासिदारिद्र्यदुःखभयहारिणिकात्वदन्यास
र्वोपकारकरणायसदार्द्रचित्ता ॥१६॥ एभिर्हतैर्जगदुपैतिसुखंतथै
तेकुर्वंतुनामनरकायचिरायपापं ॥ संग्राममृत्युमधिगम्यदिवंप्रयां
तुमत्वेतिनूनमहितान्विनिहंसिदेवि ॥१७॥ दृष्ट्वैवकिंनभवतीप्रकरो
तिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं ॥ लोकान्प्रयांतुरिपवो
पिहिशस्त्रपूताइत्थंमतिर्भवतुतेष्वहितेषुसाध्वी ॥१८॥ खड्गप्रभानि
करविस्फुरणैस्तथोग्रैःशूलाग्रकांतिनिवहेनदृशोसुराणां ॥ यन्नागता

राक्रमस्यवीर्यंच

विलयमंशुमदिंदुखंडयोग्याननंतवविलोकयतांतदेतत् ॥१९॥ दुर्वृत्तवृ
त्तशमनंतवदेविशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः ॥ वीर्यंचहंतृ
हृतदेव पराक्रमाणांवैरिष्वपिप्रकटितैवदयात्वयेत्थं ॥२०॥ के
नोपमाभवतुतेस्यप शत्रुभयकार्यतिहारिकुत्र ॥ चित्तेकृपा
समरनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि ॥२१॥ त्रैलोक्यमे
तदखिलं रिपुनाशनेनत्रातंत्वयासमरमूर्द्धनितेपिहत्वा ॥ नी
तादिवंरिपुगणाभयमप्यपास्तमस्माकमुन्मदसुरारिभवंनमस्ते ॥२२॥
शूलेनपाहिनोदेविपाहिखड्गेनचांबिके ॥ घंटास्वनेननःपाहिचापज्या
निःस्वनेनच ॥२३॥ प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे ॥ भ्रामणेना
त्मशूलस्यउत्तरस्यांतथेश्वरि ॥२४॥ सौम्यानियानिरूपाणित्रैलोक्येविचर

तिते॥ यानिचात्यर्थघोराणितैरक्षास्मांस्तथाभुवं॥२५॥खड्गशूलगदादी
नियानिचास्त्राणितेंबिकेकरपल्लवसंगीनितैरस्मानरक्ष सर्वतः॥२६
ऋषिरुवाच॥ एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः॥ अर्चिताजगतां
धात्रीतथागंधानुलेपनैः॥२७॥भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपैःसु
धूपिता॥प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान्॥२८॥देव्युवाच
व्रीयतांत्रिदशाःसर्वेयदस्मत्तोभिवांछितं॥ददाम्यहमतिप्रीत्यास्तवै
रेभिःसुपूजिता॥२९॥देवाऊचुः॥भगवत्याकृतंसर्वंनकिंचिदवशि
ष्यते॥यदयंनिहतःशत्रुरस्माकंमहिषासुरः॥३०॥यदिचापिवरोदेय
स्त्वयास्माकंमहेश्वरि॥संस्मृतासंस्मृतात्वन्नोहिंसेथाःपरमापदः॥३१
यश्चमर्त्यःस्तवैरेभिस्त्वांस्तोष्यत्यमलानने॥तस्यवित्तर्द्धिविभवैर्धनदा

रादिसंपदां॥३१॥वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्वदांबिके॥ऋषिरु
वाच॥इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः॥३३॥तथेत्युक्त्वाभद्र
कालीबभूवांतर्हितानृप॥इत्येतत्कथितंभूपसंभूतासायथापुरा
देवीदेवशरीरेभ्योजगत्त्रयहितैषिणी॥३४॥पुनश्चगौरीदेहात्सासमु
द्भूतायथाभवत्॥वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः॥३५॥रक्ष
णायचलोकानांदेवानामुपकारिणी॥तच्छृणुष्वमयाख्यातंयथा
वत्कथयामिते॥३६॥इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवि
माहात्म्येशक्रादिस्तुतिर्नाम॥४॥ऋषिरुवाच॥पुराशुंभनिशुं
भाभ्यामसुराभ्यांशचीपतेः॥त्रैलोक्यंयज्ञभागाश्चहृतामदबलाश्र
यात्॥१॥तावेवसूर्यतांतद्वदधिकारंतथैंदवं॥कौबेरमथयाम्यंच

दुर्गा॰
२३

चक्रातेवरुणस्यच ॥ २ ॥ तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्म्मच ॥ ततो
देवाविनिर्द्धूताभ्रष्टराज्याःपराजिताः ॥ ३ ॥ हृताधिकाराखिदशास्ता
भ्यांसर्वेनिराकृताः ॥ महासुराभ्यांतांदेवींसंस्मरंत्यपराजितां ॥ ४ ॥
तयास्माकंवरोदत्तोयथापत्सुस्मृताखिलाः ॥ भवतांनाशयिष्या
मितत्क्षणात्परमापदः ॥ ५ ॥ इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं ॥ ज
ग्मुस्तत्रततोदेवीविष्णुमायांप्रतुष्टुवुः ॥ ६ ॥ नमोदेव्यैमहादेव्यैशिवायैसततं
नमः ॥ नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मतां ॥ ७ ॥ रौद्रायैनमोनित्या
यैगौर्यैधात्र्यैनमोनमः ॥ ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः ॥ ८
कल्याण्यैप्रणताऋद्ध्यैसिद्ध्यैकूर्म्यैनमोनमः नैर्ऋत्यैभूभृतांलक्ष्म्यैशर्
वाण्यैतेनमोनमः ॥ ९ ॥ दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै ॥ ख्या

तैतथैवकृष्णायैधूम्रायैसततंनमः ॥ १० ॥ अतिसौम्यातिरौद्रायैनतास्त
स्यैनमोनमः ॥ नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः ॥ ११ ॥ यादेवीसर्वभू
तेषुविष्णुमायेतिशब्दिता ॥ नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ॥ १२
या॰ ॥ चेतनेत्यभिधीयतेनमस्तस्यै॰ ॥ १३ ॥ या॰ ॥ बुद्धिरूपेणसंस्थिता
नम॰ ॥ १४ ॥ या॰ ॥ निद्रारूपेणसंस्थिता ॥ नम॰ ॥ १५ ॥ या॰ ॥ क्षुधारूपे
णसंस्थितानम॰ ॥ १६ ॥ या॰ ॥ छायारूपेणसंस्थिता ॥ नम॰ ॥ १७ ॥ या॰
शक्तिरूपेणसंस्थिता॰ १८ ॥ या॰ ॥ तृष्णारूपेणसंस्थिता ॥ नम॰ १९ ॥
या॰ ॥ क्षांतिरूपेणसंस्थिता ॥ नम॰ २० ॥ या॰ ॥ जातिरूपेणसंस्थिता ॥ नम॰
या॰ ॥ लज्जारूपेणसंस्थिता ॥ नम॰ ॥ २२ ॥ या॰ ॥ शांतिरूपेणसंस्थिता ॥ न
म॰ २३ ॥ या॰ ॥ श्रद्धारूपेणसं॰ नम॰ ॥ २४ ॥ या॰ ॥ कांतिरूपेणसं॰ ॥ नम॰

या॰ लक्ष्मीरूपेण सं॰ ॥ नम॰ ॥२६॥ या॰ ॥ वृत्तिरूपेण सं॰ ॥ नम॰ ॥२७॥ या
देवीधृतिरूपेणसंस्थिता॰ ॥ या॰ ॥ स्मृतिरूपेण सं॰ ॥ नम॰ ॥२८॥ या॰ ॥ द
यारूपेण सं॰ ॥ नम॰ ॥२९॥ या॰ ॥ नीतिरूपेण सं॰ ॥ नम॰ ॥३०॥ या॰ ॥ तुष्टि
रूपेण सं॰ ॥ नम॰ ॥३१॥ या॰ ॥ पुष्टिरूपेण सं॰ ॥ नम॰ ॥३२॥ या॰ ॥ मातृरू
पेण सं॰ ॥ नम॰ ॥३३॥ या॰ ॥ भ्रांतिरूपेण सं॰ ॥ नम॰ ॥३४॥ इंद्रियाणाम
धिष्ठात्रीभूतानांचाखिलेषुयाभूतेषुस ततंतस्यैव्याप्त्यैदेव्यैनमो
नमः ॥३५॥ चितिरूपेणयाकृत्स्नमेत द्व्याप्यस्थिताजगत् ॥ नमस्त
स्यैनमस्तस्यैनमस्तस्यैनमोनमः ॥३६॥ स्तुतासुरैःपूर्वमभीष्टसंश्र
यात्तथासुरेंद्रेणदिनेषुसेविता ॥ करोतुसानःशुभहेतुरीश्वरीशुभा
निभद्राण्यभिहंतुचापदः ॥३७॥ यासांप्रतंचोद्धतदैत्यतापितै रस्मा

भिरीशाचसुरैर्नमस्यते ॥ याचस्मृतातत्क्षणमेवहंतिनः सर्वापदोभ
क्तिविनम्रमूर्तिभिः ॥३८॥ ऋषिरुवाच॰ ॥ एवंस्तवादियुक्तानांदेवानांतत्र
पार्वती ॥ स्नातुमभ्याययौतोयेजाह्नव्यानृपनंदन ॥३९॥ साब्रवीत्ता
न्सुरान्सुभ्रूर्भवद्भिःस्तूयतेत्रका ॥ शरीरकोशतश्चास्याः समुद्भूताब्र
वीच्छिवा ॥४०॥ स्तोत्रंममैतत्क्रियतेशुंभदैत्यनिराकृतैः ॥ देवैःसम
स्तैःसमरेनिशुंभेनपराजितैः ॥४१॥ शरीरकोशाद्यत्तस्याःपार्वत्यानिः
सृतांबिका ॥ कौशिकीतिसमस्तेषुततोलोकेषुगीयते ॥४२॥ तस्यां
विनिर्गतायांतुकृष्णाभूत्सापिपार्वती ॥ कालिकेतिसमाख्याताहिमा
चलकृताश्रया ॥४३॥ ततोंबिकांपरंरूपंबिभ्राणांसुमनोहरं ॥ ददर्
शचंडमुंडश्चभृत्यौ शुंभनिशुंभयोः ॥४४॥ ताभ्यांशुंभायचाख्या

तामतीवसुमनोहरा ॥ काप्यास्तिस्त्रीमहाराजभासयंतीहिमाचलं ४५
नैवतादृक्कचिद्रूपंदृष्टंकेनचिदुत्तमं ॥ ज्ञायतांकाप्यसौदेवीगृह्यतां
चासुरेश्वरी ४६ स्त्रीरत्नमतिचार्वंगी द्योतयंतीदिशस्त्विषासातुतिष्ठ
तिदैत्येंद्रतांभवान्द्रष्टुमर्हति ॥ ४७ यानिरत्नानिमणयोगजाश्वादीनि
वैप्रभो ॥ त्रैलोक्येतुसमस्तानिसांप्रतंभांतितेगृहे ४८ ऐरावतःसमा
नीतोगजरत्नंपुरंदरात ॥ पारिजाततरुश्चायंतथैवोच्चैःश्रवाहयः
४९ ॥ विमानंहंससंयुक्तमेतत्तिष्ठतितेंगणे ॥ रत्नभूतमिहानीतंय
दसीद्वेधसोद्भुतं ॥ ५० ॥ निधिरेषमहापद्मः समानीतोधनेश्वरात ॥
किंजल्किनीददौचाब्धिर्मालामम्लानपंकजां ॥ ५१ ॥ छत्रंतेवारुणंगेहे
कांचनस्रावितिष्ठति ॥ तथायंस्यंदनवरोयः पुरासीत्प्रजापतेः ॥ ५२

मृत्योरुत्क्रांतिदानामशक्तिरीशत्वयाहृता ॥ पाशःसलिलराजस्यभ्रातुस्त
वपरिग्रहे ॥ ५३ ॥ निशुंभस्याब्धिजाताश्चसमस्तारत्नजातयः ॥ वह्निर
पिददौतुभ्यमग्निशौचेचवाससी ॥ ५४ ॥ एवंदैत्येंद्ररत्नानिसमस्तान्या
हृतानिते ॥ स्त्रीरत्नमेषाकल्याणीत्वयाकस्मान्नगृह्यते ॥ ५५ ॥ ऋषिरु
वाच ॥ निशम्येतिवचःशुंभसतदाचंडमुंडयोः ॥ प्रेषयामाससुग्री
वंदूतंदेव्यामहासुरं ॥ ५६ ॥ इतिचेतिचवक्तव्यासागत्वावचनान्मम ॥
यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु ॥ ५७ ॥ ऋषिरुवाच ॥ स
तत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने ॥ सादेवीतांततःप्राहश्लक्ष्णंम
धुरयागिरा ॥ ५८ ॥ दूतउवाच ॥ देविदैत्येश्वरःशुंभस्त्रैलोक्येपरमेश्वरः
दूतोहंप्रेषितःस्तेनत्वत्सकाशमिहागतः ॥ ५९ ॥ अव्याहताज्ञःसर्वा

सुपःसदादेवयोनिषु ॥ निर्ज्जिताखिलदैत्यारिःसयदाहश्शृणुष्वतत् ॥ ६० ॥
ममत्रैलोक्यमखिलंममदेवावशानुगाः ॥ यज्ञभागानहंसर्वानुपाश्ना
मिपृथक्पृथक् ॥ ६१ ॥ त्रैलोक्येवररत्नानिममवश्यान्यशेषतः ॥ तथैवग
जरत्नंचहृत्वादेवेंद्रवाहनं ॥ ६२ ॥ क्षीरोदमथनोद्भूतमश्वरत्नंममामरैः
उच्चैःश्रवससंज्ञंतत्प्रणिपत्यसमर्पितं ॥ ६३ ॥ यानिचान्यानिदेवेषुगंध
र्वेषुरगेषुच ॥ रत्नभूतानिभूतानितानिमय्येवशोभने ॥ ६४ ॥ स्त्रीरत्नभूतां
त्वांदेवीलोकेमन्यामहेवयं ॥ सात्वमस्मानुपागच्छयतोरत्नभुजोवयं ॥ ६
५ ॥ मांवाममानुजंवापिनिशुंभमुरुविक्रमं ॥ भजत्वंचंचलापांगिरत्न
भूतासिवैयत ॥ ६६ ॥ परमैश्वर्यमतुलंप्राप्स्यसेमत्परिग्रहात् ॥ एतद्बु
द्ध्यासमालोक्यमत्परिग्रहतांव्रज ॥ ६७ ॥ ऋषिरुवाच ॥ इत्युक्तासातदा

देवीगंभीरांतःस्मिताजगौ ॥ दुर्गाभगवतीभद्रायययेदंधार्यतेजगत् ॥ ६८ ॥
देव्युवाच ॥ सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्त्वयोदितं ॥ त्रैलोक्या
धिपतिःशुंभोनिशुंभश्चापितादृशः ॥ ६९ ॥ किंत्वत्रयत्प्रतिज्ञातंमिथ्या
तत्क्रियतेकथं ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा ॥ ७० ॥ यो
मांजयतिसंग्रामेयोमेदर्पंव्यपोहति ॥ योमेप्रतिबलोलोकेसमेभर्त्ता
भविष्यति ॥ ७१ ॥ तदागच्छतुशुंभोत्रनिशुंभोवामहासुरः ॥ मांजित्वा
किंचिरेणात्रपाणिंगृह्णातुमेलघु ॥ ७२ ॥ दूतउवाच ॥ अवलिप्तासिमै
वंत्वंदेविब्रूहिममाग्रतः ॥ त्रैलोक्येकःपुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः ॥ ७३
अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि ॥ तिष्ठंतिसंमुखेदेविकिंपुनः
स्त्रीत्वमेकिका ॥ ७४ ॥ इंद्राद्याःसकलादेवास्तस्थुर्येषांनसंयुगे ॥ शुंभा

॥श्री०॥
॥२९॥

दीनांकथंतेषांस्त्रीप्रयास्यसिसंमुखं॥७५॥सात्वंगच्छमयैवोक्तापार्श्वं
शुंभनिशुंभयोः॥केशाकर्षणनिर्धूतगौरवामागमिष्यसि॥७६॥देव्यु
वाच॥एवमेतद्बलीशुंभोनिशुंभश्चातिवीर्यवान्॥किंकरोमिप्रति
ज्ञामेयदनालोचितापुरा॥७७॥सत्वंगच्छमयैवोक्तंयदेतत्सर्वमादृतः
तदाचक्ष्वसुरेंद्रायसचयुक्तंकरोतुयत्॥७८॥इतिमार्कंडेयपुराणे
सावर्णिकेमन्वंतरेदेवीमाहात्म्येदेव्यादूतसंवादः॥५॥ऋषिरु
६ वाच॥इत्याकर्ण्यवचोदेव्याःसदूतोमर्षपूरितः॥समाचष्टसमाग
म्यदैत्यराजायविस्तरात्॥१॥तस्यदूतस्यतद्वाक्यमाकर्ण्यासुरराट्ततः
सक्रोधःप्राहदैत्यानामधिपंधूम्रलोचनं॥२॥हेधूम्रलोचनाशुत्वं
स्वसैन्यपरिवारितः॥तामानयबलाद्दुष्टांकेशाकर्षणविह्वलां॥३॥

तत्परित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः॥सहंतव्योमरोवापियक्षोगं
धर्वएववा॥४॥ऋषिरुवाच॥तेनाज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलो
चनः॥वृतःषष्ट्यासहस्राणामसुराणांद्रुतंययौ॥५॥सदृष्ट्वातांततोदे
वींतुहिनाचलसंस्थितां॥जगादोच्चैःप्रयाहीतिमूलंशुंभनिशुंभयोः
नचेत्प्रीत्याद्यभवतीमद्भर्तारमुपैष्यति॥ततोबलान्नयाम्येषकेशाक
र्षणविह्वलां॥७॥देव्युवाच॥दैत्येश्वरेणप्रहितोबलवान्बलसंवृतः
बलान्नयसिमामेवंततःकिंतेकरोम्यहं॥८॥ऋषिरुवाच॥इत्युक्तः
सोभ्यधावत्तामसुरोधूम्रलोचनः॥हुंकारेणैवतंभस्मसाचकारांबि
काततः॥९॥अथक्रुद्धंमहासैन्यमसुराणांतथांबिका॥ववर्षसा
यकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः॥१०॥ततोधुतसटःकोपात्कृत्वा

॥दुर्गा॥
॥२८॥

दंसुभैरवंपपातासुरसेनायांसिंहोदेव्यास्ववहेनवो॥११॥कांश्चित्कर
प्रहारेणदैत्यानास्यनचापरान्॥आक्रांत्याचाधरेणान्यान्जघानसुम
हासुरान्॥१२॥केषांचित्पाटयामासनखैःकोष्ठानिकेशरी॥तथात
लप्रहारेणशिरांसिकृतवान्पृथक्॥१३॥विछिन्नबाहुशिरसःकृता
स्तेनतथापरे॥पपौचरुधिरंकोष्ठादन्येषांधूतकेसर॥१४॥क्षणेनत
द्बलंसर्वंक्षयंनीतंमहात्मना॥तेनकेसरिणादेव्यावाहनेनातिकोपित
श्रुत्वातमसुरंदेव्यानिहंतंधूम्रलोचनं॥बलंचक्षयितंकृत्स्नंदेवीके
सरिणाततः॥१६॥चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिताधरः॥आ
ज्ञापयामासचतौचंडमुंडौमहासुरौ॥१७॥हेचंडहेमुंडबलैःबहु
लैःपरिवारितौ॥तत्रगच्छतगत्वाचसासमानीयतांलघु॥१८॥

केशेष्वाकृष्यबध्वावायदिवःसंशयोयुधि॥तदाशेषायुधैःसर्वैर
सुरैर्विनिहन्यतां॥१९॥तस्यांहतायांदुष्टायांसिंहेचविनिपातिते
शीघ्रमागम्यतांबध्वागृहीत्वातामथांबिका॥२०॥इतिमार्कंडेय
पुराणेसावर्णिकेमन्वंतरेदेवीमाहात्मयेशुंभनिशुंभसेनानी
धूम्रलोचनवधः॥६॥ऋषिरुवाच॥आज्ञप्तास्ततोदैत्याश्चं
डमुंडपुरोगमाः॥चतुरंगबलोपेताययुरभ्युद्यतायुधाः॥१॥ददृशु
स्ततोदेवीमीषद्धासांव्यवस्थिता॥सिंहस्योपरिशैलेंद्रशृंगेम
हतिकांचने॥२॥तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः॥आकृष्ट
चापासिधरास्तथान्येतत्समीपगाः॥३॥ततःकोपंचकारोच्चैरंबि
कातानरीन्प्रति॥कोपेनचास्यावदनंमषीवर्णमभूत्तदा॥४॥

कुटिकुटिलात्तस्य ललाटफलकाद्द्रुतं। काली करालवदना विनिष्क्रा
न्तासिपाशिनी ५ विचित्रखट्वांगधरा नरमालाविभूषणा। द्वीपिच
र्मपरीधाना शुष्कमांसातिभैरवा ६ अतिविस्तारवदना जिह्वालल
नभीषणा। निमग्नारक्तनयना नादापूरितदिङ्मुखा ७ सा वेगेना
भिपतिता घातयंती महासुरान्। सैन्ये तत्र सुरारीणामभक्षयत त
द्बलं ८ पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान्। समादायै
कहस्तेन मुखे चिक्षेप वारणान् ९ तथैव योधं तुरगै रथं सारथि
ना सह। निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवं १० एकं जग्राह के
शेषु ग्रीवायामथ चापरं। पादेनाक्रम्य चैवान्यमुरसान्यमपो
थयत् ११ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः। मुखेन

जग्राह रुषा दशनैर्मथितान्यपि १२ बलिनां तद्बलं सर्वमसुराणां महा
त्मनां। ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा १३ असिना निह
ताः केचित्केचित् खट्वांगताडिताः। जग्मुर्विनाशमसुरा दंताग्राभिहता
स्तथा १४ क्षणेन तद्बलं सर्वमसुराणां निपातितं। दृष्ट्वा चंडोऽभिदुद्रा
व तां कालीमतिभीषणां १५ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महा
सुरः। छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः १६ तानि चक्रा
ण्यनेकानि विशमानानि तन्मुखं। बभुर्यथार्कबिंबानि सुबहूनि
घनोदरं १७ ततो जहासातिरुषा भीमं भैरवनादिनी। कालीक
रालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला १८ उत्थाय च महासिंहं देवी चं
डमधावत। गृहीत्वा चास्य केशेषु शिरस्तेनासिना छिनत् १९

अथमुंडोप्यधावत्तांदृष्ट्वाचंडंनिपातितं ॥ तमप्ययातयद्भूमौसाख
ड्गाभिहतंरुषा ॥ २० ॥ हतशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितं ॥ मुंडंच
सुमहावीर्यंदिशोभेजेभयातुरं ॥ २१ ॥ शिरश्चंडस्यकालीचगृही
त्वामुंडमेवच ॥ प्राहप्रचंडाट्टहासमिश्रमभ्येत्यचंडिकां ॥ २२ ॥ म
यातवात्रोपहृतौचंडमुंडौमहापशू ॥ युद्धयज्ञेस्वयंशुंभंनिशुं
भंचहनिष्यसि ॥ २३ ॥ ऋषिरुवाच ॥ तावानीतौततोदृष्ट्वाचंडमुंडौ
महासुरौ ॥ उवाचकालींकल्याणीललितंचंडिकावचः ॥ २४ ॥ य
स्माच्चंडंचमुंडंचगृहीत्वात्वमुपागता ॥ चामुंडेतिततोलोकेख्याता
देवीभविष्यसि ॥ २५ ॥ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदे
वीमाहात्म्येचंडमुंडवधः ॥ ७ ॥ ऋषिरुवाच ॥ चंडेचनिहतेदैत्येमुं

डेचविनिपातिते ॥ बहुलेषुचसैन्येषुक्षयितेष्वसुरेश्वरः ॥ १ ॥ ततःको
पपराधीनचेताःशुंभःप्रतापवान् ॥ उद्योगंसर्वसैन्यानांदैत्यानामा
दिदेशह ॥ २ ॥ अद्यसर्वबलैर्दैत्याःषडशीतिरुदायुधाः ॥ कंबूनांच
तुरशीतिर्निर्यांतुस्वबलैर्वृताः ॥ ३ ॥ कोटिवीर्याणिपंचाशदसुरा
णांकुलानिवै ॥ शतंकुलानिधौम्राणांनिर्गच्छंतुममाज्ञया ॥ ४ ॥ का
लकादौर्हृदामौर्याःकालकेयास्तथासुराः ॥ युद्धायसज्जानिर्यांतुआ
ज्ञयात्वरितामम ॥ ५ ॥ इत्याज्ञाप्यासुरपतिःशुंभोभैरवशासनः ॥
निर्जगाममहासैन्यसहस्रैर्बहुभिर्वृतः ॥ ६ ॥ आयांतंचंडिकादृष्ट्वा
तत्सैन्यमतिभीषणं ॥ ज्यास्वनैःपूरयामासधरणीगगनांतरं ॥ ७ ॥ ततःसिं
होमहानादमतीवकृतवान्नृप ॥ घंटास्वनेनतन्नादमंबिकाचोप

दुर्गा० ३१

हंहयत ॥८॥ धनुर्ज्यासिंहघंटानां शब्दापूरितदिङ्मुखा ॥ निनादैर्भीष नादै
णैः काली जिग्ये विस्तारितानना ॥९॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्च
तुर्दिशं ॥ देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥१०॥ एतस्मिन्नं
तरे भूपविनाशाय सुरद्विषां भवायामरसिंहानामतिवीर्यबला
न्विता ॥११॥ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः शरीरेभ्यो विनि
ष्क्रम्य तद्रूपैश्चंडिकां ययुः ॥१२॥ यस्य देवस्य यद्रूपं यथा भूषणवा
हनं ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥१३॥ हंसयुक्तविमा
नाग्रे साक्षसूत्रकमंडलुः ॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणीत्यभि
धीयते ॥१४॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया
प्राप्ता चंद्ररेखाविभूषणा ॥१५॥ कौमारी शक्तिहस्ता च मयूरवरवा

राम ३१

हना ॥ योद्धुमभ्याययौ दैत्यानांबिका गुहरूपिणी ॥१६॥ तथैव वैष्णवी
शक्तिर्गरुडोपरि संस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाय
यौ ॥१७॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः साप्याययौ
तत्र वाराहीं बिभ्रती तनुं ॥१८॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं व
पुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥१९॥ वज्रहस्ता तथै
वैंद्री गजराजोपरि स्थिता ॥ प्राप्ता सहस्रनयना यथा शक्रस्त
थैव सा ॥२०॥ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥ हन्यंताम
सुराः शीघ्रं मम प्रीत्याह चंडिकां ॥२१॥ ततो देवीशरीरात्तु विनिष्क्रां
तातिभीषणा ॥ चंडिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥२२॥ सा
चाह धूम्रजटिलमीशानमपराजिता ॥ दूत त्वं गच्छ भगवन्पार्श्वं शुं

मनिशुंभयो:॥२३॥ब्रूहिशुंभंनिशुंभंचदानवावतिगर्वितौ॥येचा
न्येदानवास्तत्रयुद्धायसमुपस्थिता॥२४॥त्रैलोक्यमिंद्रोलभतांदेवा:
संतुहविर्भुज:॥यूयंप्रयातपातालंयदिजीवितुमिच्छथ॥२५॥बला
बलेपादथचेद्भवंतोयुद्धकांक्षिण:॥तदागच्छततृप्यंतुमच्छिवा:पि
शितेनव:॥२६॥यतोनियुक्तोदौत्येनतयादेव्याशिव:स्वयं॥शिवदूती
तिलोकेस्मिंस्तत:साख्यातिमागता॥२७॥तेपिश्रुत्वावचोदेव्या:शर्वा
ख्यातंमहासुरा:॥अमर्षापूरिताजग्मुर्यत:कात्यायनीस्थिता॥२८॥
तत:प्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभि:॥ववर्षुरुद्धतामर्षास्तांदे
वीममरारय:॥२९॥साचतान्प्रहितान्बाणान्शूलचक्रपरश्व
धान्॥चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभि:॥३०॥तस्याग्रतस्त

थाकालीशूलपातविदारितान्खट्वांगपोथितांश्चारीन्कुर्वतीव्यचरत्त
दा॥३१॥कमंडलुजलाक्षेपहतवीर्यान्हतौजस:॥ब्रह्माणीचाकरोच्छत्रून्
येनयेनस्मधावति॥३२॥माहेश्वरीत्रिशूलेनतथाचक्रेणवैष्णवीदैत्या
न्जघानकौमारीतथाशक्त्यातिकोपना॥३३॥ऐंद्रीकुलिशपातेनशत
शोदैत्यदानवा:॥पेतुर्विदारिता:पृथ्व्यांरुधिरौघप्रवर्षिण:॥३४॥तुंडप्र
हारविध्वस्तादंष्ट्राग्रक्षतवक्षस:॥वाराहमूर्त्यान्यपतंश्चक्रेणचविदा
रिता:॥३५॥नखैर्विदारितांश्चान्यान्भक्षयंतीमहासुरान्॥नारसिंहीच
चारजौनादापूर्णदिगंबरा॥३६॥चंडाट्टहासैरसुरा:शिवदूत्यभिदूषि
ता:॥पेतु:पृथिव्यांपतितांस्तांश्चखादाथसातदा॥३७॥इतिमातृग
णंक्रुद्धंमर्दयंतंमहासुरान्॥दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनि

का:॥३८॥ पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान्॥ योद्धुमभ्याय
यौ क्रुद्धो रक्तबीजो महासुर:॥३९॥ रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरत:॥ स
मुत्पतति मेदिन्यां तत्प्रमाणास्तदासुर:॥४०॥ युयुधे स गदापाणिरिंद्रश
क्त्या महासुर:॥ ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत्॥४१॥ कुलिशे
नाहतस्याशु तस्य सुस्राव शोणितं॥ समुत्तस्थुस्ततो योधास्तद्रूपा
स्तत्पराक्रमा:॥४२॥ यावंत: पतितास्तस्य शरीराद्रक्तबिंदव:॥ तावंत:
पुरुषा जातास्तद्वीर्यबलविक्रमा॥४३॥ ते चापि युयुधुस्तत्र पुरुषार
क्तसंभवा:॥ समं मातृभिरत्युग्रशस्त्रपातातिभीषणं॥४४॥ पुनश्च व
ज्रपातेन क्षतमस्य शिरो यदा॥ ववाह रक्तं पुरुषास्ततो जाता: सहस्र
श:॥४५॥

॥ वैष्णवी समरे चैनं चक्रेणाभिजघान ह॥ गदया ताडया
मास ऐंद्री तमसुरेश्वरं॥४६॥ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवै:
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरै:॥४७॥ शक्त्या जघान कौमारी वा
राही च तथासिना॥ माहेश्वरी त्रिशूलेन रक्तबीजं महासुरं॥४८॥ स चा
पि गदया दैत्य: सर्वा एवाहनत्पृथक्॥ मातृ: कोपसमाविष्टो रक्तबी
जो महासुर:॥४९॥ तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि॥ पपात
यो वै रक्तौघस्तेनासञ्छतशोसुरा:॥५०॥ तैश्चासुरासृक्संभूतैरसुरै:
सकलं जगत्॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमं॥५१॥ तान्वि
षण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा॥ उवाच कालीं चामुंडे विस्तीर
वदनं कुरु॥५२॥ मच्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान्॥ रक्तबिं

॥दुर्गा०॥
॥३४॥

दोत्पतीस्तु त्वं वक्रेणानेन वेगिना ॥५३॥ भक्ष्यंती चर रणे तदुत्पन्नान्म
हासुरान् ॥ एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥५४॥ भक्ष्यमाणा
स्त्वया चोग्रा न चोत्पत्स्यंति चापरे ॥ इत्युक्त्वा तां ततो देवी शूलेना
भिजघान तं ॥५५॥ मुखेन काली जगृहे रक्तबीजस्य शोणितं ॥ ततोसावा
जघानाथ गदयात्र चंडिकां ॥५६॥ न चास्या वेदनां चक्रे गदापातो
ल्पिकामपि ॥ तस्याहतस्य देहात्तु वहु सुस्राव शोणितं ॥५७॥ यतस्तत
स्तद्वक्रेण चामुंडा संप्रतीच्छति ॥ मुखे समुद्गता येस्या रक्तपातान्महा
सुराः ॥५८॥ तांश्चखादाथ चामुंडा पपौ तस्य च शोणितं ॥ देवी शूले
न वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥५९॥ जघान रक्तबीजं तं चामुंडापी
तशोणितं ॥ स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥६०॥ नीरक्त

॥राम॥
॥३४॥

श्च महीपाल रक्तबीजो महासुरः ॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा
नृप ॥६१॥ तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ इति मार्कंडेयपु
राणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधः ॥८॥ राजो
वाच ॥ विचित्रमिदमाख्यातं भगवन्भवता मम ॥ देव्याश्चरितमा
हात्म्यं रक्तबीजवधाश्रितं ॥१॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपाति
ते ॥ चकार शुंभो यत्कर्म निशुंभश्चातिकोपनः ॥२॥ ऋषिरुवाच ॥
चकार कोपमतुलं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हते
ष्वन्येषु चाहवे ॥३॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥ अभ्य
धावन्निशुंभोथ मुख्ययासुरसेनया ॥४॥ तस्याग्रतस्तथा पृष्ठे पा
र्श्वयोश्च महासुराः ॥ संदष्टौष्ठपुटाः क्रुद्धा हंतुं देवीमुपाययुः ॥५॥

॥दुर्गा॥
॥३५॥

आजगाममहावीर्य्यः शुंभोपिस्वबलैर्वृतः ॥ निहंतुंचंडिकांकोपात्कृत्वा
युद्धंतुमातृभिः ॥६॥ ततोयुद्धमतीवासीत्देव्याःशुंभनिशुंभयोः ॥ शरव
र्षमतीवोग्रं ॥ मेघयोरिववर्षतोः ॥७॥ चिच्छेदास्ताञ्छरांस्ताभ्यांचंडिकास्व
शरोत्करैः ॥ ताडयामासचांगेषुशस्त्रौघैरसुरेश्वरौ ॥८॥ निशुंभोनिशि
तंखड्गंचर्मचादायसुप्रभं ॥ अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्त
मं ॥९॥ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमं ॥ निशुंभस्याशुचिच्छे
दचर्मचाप्यष्टचंद्रकं ॥१०॥ छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसो
सुरः ॥ तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां ॥११॥ कोपाध्मा
तोनिशुंभोथशूलंजग्राहदानवः ॥ आयातंमुष्टिपातेनदेवीतच्चा
प्यचूर्णयत ॥१२॥ आविध्याथगदांसोपिचिक्षेपचंडिकांप्रति ॥

॥राम॥
॥३५॥

सापिदेव्यात्रिशूलेनहताभस्मत्वमागता ॥१३॥ ततःपरशुहस्तंतमा
यांतंदैत्यपुंगवं ॥ आहत्यदेवीबाणौघैरपातयत भूतले ॥१४॥ त
स्मिन्निपतितेभूमौनिशुंभेभीमविक्रमे ॥ भ्रातर्यतीवसंक्रुद्धःप्रय
यौहंतुमंबिकां ॥१५॥ सरथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥ भुजै
रष्टाभिरतुलैर्व्याप्याशेषंबभौनभः ॥१६॥ तमायांतंसमालोक्यदे
वीशंखमवादयत ॥ ज्याशब्दंचापिधनुषश्चकारातीवदुःसहं ॥१७॥
पूरयामासककुभोनिजघंटास्वनेनच समस्तदैत्यसैन्यानांतेजोव
धविधायिना ॥१८॥ ततःसिंहोमहानादैस्त्याजितेभमहामदैः ॥ पूर
यामासगगनंगांतथोपदिशोदश ॥१९॥ ततःकालीसमुत्पत्यगगनं
क्ष्मामताडयत ॥ कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः ॥२०॥

धनुषश्चापी

अट्टाहासमशिवंशिवदूतीचकारह ॥ तैःशब्दैरसुरास्त्रेसुःशुंभःको
पंपरंययौ ॥ २१ ॥ दुरात्मंस्तिष्ठतिष्ठतिव्याजहारांबिकायदातदाजये
त्यभिहितंदेवैराकाशसंस्थितैः ॥ २२ ॥ शुंभेनागत्ययाशक्तिर्मुक्ताज्वा
लातिभीषणा ॥ आयांतीवह्निकूटाभासानिरस्तामहोल्कया ॥ २३ ॥
सिंहनादेनशुंभस्यव्याप्तंलोकत्रयांतरं ॥ निर्घातनिस्वनोघोरोजि
तवानवनीपते ॥ २४ ॥ शुंभमुक्तांछरांदेवीशुंभस्तत्प्रहितांछरान् चि
छेदस्वशरैरुग्रैःशतशोथसहस्रशः ॥ २५ ॥ ततःसचंडिकाक्रुद्धाशूले
नाभिजघानतं ॥ सतदाभिहतोभूमौमूर्छितोनिपपातह ॥ २६ ॥ ततो
निशुंभःसंप्राप्यचेतनामात्तकार्मुकः ॥ आजघानशरैर्देवींकाली
केसरिणंतथा ॥ २७ ॥ पुनश्चकृत्वाबाहूनामयुतंदनुजेश्वरः ॥ चक्रा

युधेनदितिजश्छादयामासचंडिकां ॥ २८ ॥ ततोभगवतीक्रुद्धादुर्गा
दुर्गार्त्तिनाशिनी ॥ चिछेदतानिचक्राणिस्वशरैःसायकांश्चतान् ॥
२९ ॥ ततोनिशुंभोवेगेनगदामादायचंडिकां ॥ अभ्यधावत्तवैहं
तुंदैत्यसेनासमावृतः ॥ ३० ॥ तस्यापततएवाशुगदांचिछेदचंडि
कां ॥ खड्गेनशितधारेणसचशूलंसमाददे ॥ ३१ ॥ शूलहस्तंसमायं
तंनिशुंभममरार्द्दनं ॥ हृदिविव्याधशूलेनवेगाविद्धेनचंडिका ॥ ३२ ॥
भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः ॥ महाबलोमहावीर्यस्ति
ष्ठेतिपुरुषोवदन् ॥ ३३ ॥ तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः ॥ शि
रश्चिछेदखड्गेनततोसावपतद्भुवि ॥ ३४ ॥ ततःसिंहश्चखादोग्रदंष्ट्रा
क्षुणशिरोधरान् ॥ असुरांस्तांस्तथाकालीशिवदूतीतथापरान् ॥

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्माणीमंत्रपूतेन तो
येनान्ये निराकृताः ३६ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे वा
राहीतुंडघातेन केचिच्चूर्णीकृता भुवि ३७ खंडंखंडं च चक्रेण वै
ष्णव्या दानवाः कृताः वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ३८
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् भक्षिताश्चापरे का
लीशिवदूतीमृगाधिपैः ३९ इति मार्कंडेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये निशुंभवधः ॥ ९ ॥ ऋषिरुवाच ॥ निशुं
भं निहतं दृष्ट्वा भ्रातरं प्राणसंमितं हन्यमानं बलं चैव शुंभः क्रु
द्धोऽब्रवीद्वचः १ बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह अन्यासां ब
लमाश्रित्य युध्यसे यातिमानिनी २ देव्युवाच ॥ एकैवाहं जग

त्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूत
यः २ ऋषिरुवाच ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा ल
यं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ३ देव्युवाच
अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता तत्संहृतं मयैकैव तिष्ठा
म्याजौ स्थिरो भव ४ ऋषिरुवाच ततः प्रववृते युद्धं देव्याः शुंभ
स्य चोभयोः पश्यतां सर्वदेवानामसुराणां च दारुणं ५ शरवर्षैः
शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः तयोर्युद्धमभूद्भूयः सर्वलोक
भयंकरं ६ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका बभं
ज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ७ मुक्तानि तेन चास्त्राणि
दिव्यानि परमेश्वरी बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ८

ततः शरशतैर्देवीमाछादयत सोसुरः ॥ सापि तत्कुपिता देवी धनु
श्चिछेद चेषुभिः ॥१०॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चि
छेद देवी चक्रेण तामप्यस्य करे स्थितां ॥११॥ ततः खड्गमुपादाय श
तचंद्रं च भानुमत् ॥ अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥१२
तस्यापतत एवाशु खड्गं चिछेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणै
श्चर्म चार्ककरामलं ॥१३॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः
जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥१४॥ चिछेदापततस्तस्य मु
द्गरं निशितैः शरैः ॥ तथापि सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्
स मुष्टिं पातयामास हृदये दैत्यपुंगवः ॥ देव्यास्तं चापि सा देवी त
लेनोरस्यताडयत् ॥१६॥ तलप्रहाराभिहतो निपपात महीतले

स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥१७॥ उत्पत्य च प्रगृह्योच्चैर्दे
वीं गगनमास्थितः ॥ तत्रापि सा निराधारा युयुधे तेन चंडिका ॥१८
नियुद्धं खे तदा दैत्यश्चंडिका च परस्परं ॥ चक्रतुः प्रथमं सिद्धमुनिवि
स्मयकारकं ॥१९॥ ततो नियुद्धं सुचिरं कृत्वा तेनांबिका सह ॥ उत्पात्य
भ्रामयामास चिक्षेप धरणीतले ॥२०॥ स क्षिप्तो धरणीं प्राप्य मुष्टि
मुद्यम्य वेगितः ॥ अभ्यधावत दुष्टात्मा चंडिकानिधनेछया ॥२१॥
तमायांतं ततो देवी सर्वदैत्यजनेश्वरं ॥ जगत्यां पातयामास भित्वा
शूलेन वक्षसि ॥२२॥ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः
चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां ॥२३॥ ततः प्रसन्नमखि
लं हते तस्मिन्दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्न

नः ॥२४॥ उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥ सरितो मार्ग
वाहिन्यस्तथासंस्तत्र पातिते ॥२५॥ ततो देवगणाः सर्वे हर्षनिर्भर
मानसाः ॥ बभूवुर्निहते तस्मिन्गंधर्वा ललितं जगुः ॥२६॥ अवादयं
स्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वाताः सुप्रभो
भूद्दिवाकरः ॥ जज्वलुश्चाग्नयः शांताः शांतादिग्जनितस्वना ॥२७॥ इति
मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभवधः ॥१०॥
ऋषिरुवाच ॥ देव्या हते तत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमा
स्तां ॥ कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्जविकाशिता
शाः ॥१॥ देवा ऊचुः ॥ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतो
खिलस्य ॥ प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥२

ना

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥ अपां स्व
रूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ॥३॥ त्वं वैष्णवी श
क्तिरनंतवीर्या विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि सम
स्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥ विद्याः समस्तास्तव देवि भे
दाः स्त्रियः समस्ताः सकला जगत्सु ॥ त्वयैकया पूरितमंबयैतत्का ते
स्तुतिः स्तव्यपरापरोक्तिः ॥५॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी
त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ॥६॥ सर्वस्य बुद्धिरूपेण जन
स्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते ॥७॥ कला
काष्ठादिरूपेण परिणामप्रदायिनि ॥ विश्वस्योपरतौ शक्ते ना० ॥८॥
सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि ना० ॥९

सृष्टिस्थितिविनाशानांशक्तिभूतेसनातनि॥ गुणाश्रयेगुणमयेना०
१०॥शरणागतदीनार्त्तपरित्राणपरायणे॥ सर्वस्यार्तिहरेदेवि०॥ ११
हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणि॥ कौशांभःक्षरिकेदेविना०
१२॥त्रिशूलचंद्राहिधरेमहावृषभवाहिनि॥ माहेश्वरीस्वरूपेणनारा
यणिनमोस्तुते॥१३॥मयूरकुक्कुटवृत्तेमहाशक्तिधरेनघे॥ कौमारी
रूपसंस्थनेना०॥१४॥शंखचक्रगदाशार्ङ्ग०गृहीतपरमायुधे॥प्र
सीदवैष्णवीरूपेना०॥१५॥गृहीतोग्रमहाचक्रेदंष्ट्रोध्धृतवसुंधरे
वराहरूपिणिशिवेना०॥१६॥नृसिंहरूपेणोग्रेणहंतुंदैत्यान्कृतो
द्यमे॥त्रैलोक्यत्राणसहितेना०॥१७॥किरीटिनिमहावज्रेसहस्रन
यनोज्वलेवृत्रप्राणहरेचैंद्रिना०॥१८॥शिवदूतिस्वरूपेणहतदैत्य

महाबले॥घोररूपेमहारावेना०॥१९॥दंष्ट्राकरालवदनेशिरोमालावि
भूषणे॥चामुंडेमुंडमथनेना०॥२०॥लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टि
स्वधेध्रुवे॥महारात्रिमहाविद्येना०॥२१॥मेधेसरस्वतिवरेभूतिबा
भ्रवितामसि॥नियतेत्वंप्रसीदेशेना०॥२२॥सर्वतःपाणिपादांते
सर्वतोक्षिशिरोमुखे॥सर्वतःश्रवणघ्राणेनारा०॥सर्वस्वरूपेसर्वे
शेसर्वशक्तिसमन्विते॥भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते२३
एतत्तेवदनंसौम्यंलोचनत्रयभूषितं॥पातुनःसर्वभूतेभ्यःकात्या
यनिनमोस्तुते॥२४॥ज्वालाकरालमत्युग्रमशेषासुरसूदनं॥त्रिशू
लंपातुनोभीतिर्भद्रकालिनमोस्तुते॥२५॥हिनस्तिदैत्यतेजांसिस्वने
नापूर्यजगत्॥साघंटापातुनोदेविपापेभ्योनःसुतानिव॥२६

असुरासृग्वसापंकचर्चितस्तेकरोज्ज्वलः॥ शुभायखड्गोभवतुचंडिके
त्वांनतावयं॥२७॥ रोगानशेषानपहंसितुष्टारुष्टातुकामान्सकला
नभीष्टान्॥ त्वामाश्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतांप्र
यांति॥२८॥ एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविमहासुराणां॥
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वांबिकेतत्प्रकरोतिकान्या॥२९॥ वि
द्यासुशास्त्रेषुविवेकदीपेष्वाद्येषुवाक्येषुचकात्वदन्या॥ ममत्वगर्ते
ऽतिमहांधकारेविभ्रामयत्येतदतीवविश्वं॥३०॥ रक्षांसियत्रोग्रवि
षाश्चनागायत्रारयोदस्युबलानियत्र॥ दावानलोयत्रतथाब्धिम
ध्येतत्रस्थितात्वंपरिपासिविश्वं॥३१॥ विश्वेश्वरित्वंपरिपासिवि
श्वंविश्वात्मिकाधारयसीतिविश्वं॥ विश्वेशवंद्याभवतीभवंति

ते
॥राम॥
॥४२॥

विश्वाश्रयायेत्वयिभक्तिनम्राः॥३२॥ देविप्रसीदपरिपालयनोरिभीते
र्नित्यंयथासुरवधादधुनैवसद्यः॥ पापानिसर्वजगतांप्रशमंनया
शुत्पातपाकजनितांश्चमहोपसर्गान्॥३३॥ प्रणतानांप्रसीदत्वंदे
विविश्वार्त्तिहारिणि॥ त्रैलोक्यवासिनामीड्येलोकानांवरदाभव॥३४॥
देव्युवाच॥ वरदाहंसुरगणावरंयन्मनसेच्छथ॥ तंवृणुध्वंप्रयच्छा
मिजगतामुपकारकं॥३५॥ देवाऊचुः॥ सर्वाबाधाप्रशमनंत्रैलो
क्यस्याखिलेश्वरि॥ एवमेवत्वयाकार्यमस्मद्वैरिविनाशनं॥३६॥ दे
व्युवाच॥ वैवस्वतेंऽतरेप्राप्तेअष्टाविंशतिमेयुगे॥ शुंभोनिशुंभश्चैवा
न्यावुत्पत्स्येतेमहासुरौ॥३७॥ नंदगोपगृहेजातायशोदागर्भसंभवा॥ ततः
स्तौनाशयिष्यामिविंध्याचलनिवासिनी॥३८॥ पुनरप्यतिरौद्रेणरू

पेण पृथिवीतले ॥ अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ३९ ॥ भ
क्षयंत्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ॥ रक्ता दंता भविष्यंति दा
डिमीकुसुमोपमाः ॥ ४० ॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥
स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां ॥ ४१ ॥ भूयश्च शतवार्षिक्याम
नावृष्ट्यामनंभसि ॥ मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनि
जा ॥ ४२ ॥ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥ कीर्तयिष्यं
ति मनुजाः शताक्षीमिति मां ततः ॥ ४३ ॥ ततोहमखिलं लोकमात्मदे
हसमुद्भवैः ॥ भविष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४४ ॥ शा
कंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि दु
र्गमाख्यं महासुरं ॥ ४५ ॥ पुनश्चाहं यदा भीमं रूपं कृ ॥ त्वा हिमाचले र

क्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ ४६ ॥ तदा मां मुनयः
सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥
४७ ॥ यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ तदाहं भ्रामरं रूपं कृ
त्वासंख्येयषट्पदं ॥ ४८ ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ॥
भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ ४९ ॥ इत्थं यदा यदा बाधा
दानवोत्था भविष्यति ॥ तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं ॥ ५० ॥
इति मार्कंडेय पुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये नारायणीस्तु
तिर्नाम ॥ ११ ॥ देव्युवाच ॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समा
हितः ॥ तस्याहं सकलां बाधां शमयिष्याम्यसंशयं ॥ १ ॥ मधुकैटभ
नाशं च महिषासुरघातनं ॥ कीर्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः ॥ २

अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः॥ श्रोष्यंतिचैवएभक्त्यामम
माहात्म्यमुत्तमं॥३॥ नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापदः॥ भवि
ष्यंतिनदारिद्र्यंनचैवेष्टवियोजनं॥४॥ शत्रुतोनभयंतस्यदस्युतोवान
राजतः॥ नशस्त्रानलतोयोघात्कदाचित्संभविष्यति॥ तस्मान्ममैत
न्महात्म्यंपठितव्यंसमाहितैः॥ श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनं
हितत्॥६॥ उपसर्गानशेषांस्तुमहामारीसमुद्भवान्॥ तथात्रिवि
धमुत्पातंमहात्म्यंशमयेन्मम॥७॥ यत्रैतत्पठ्यतेसम्यङ्नित्यमा
यतनेमम॥ सदानतद्विमोक्ष्यामिसांनिध्यंतत्रमेस्थितं॥८॥ ब
लिप्रदानेपूजायामग्निकार्य्येमहोत्सवे॥ सर्वंममैतच्चरितमुच्चार्यं
श्राव्यमेवच॥९॥ जानताजानतावापिबलिपूजांतथाकृतं॥ प्रती

च्छिष्याम्यहंप्रीत्यावन्हिहोमंतथाकृतं॥१०॥ शरत्कालेमहापूजाक्रिय
तेयाचवार्षिकी॥ तस्यांममैतन्महात्म्यंश्रुत्वाभक्तिसमन्वितः॥११॥ सर्व
बाधाविनिर्मुक्तोधनधान्यसुतान्वितः॥ मनुष्योमत्प्रसादेनभविष्य
तिनसंशयः॥१२॥ श्रुत्वाममैतन्महात्म्यंतथाचोत्पत्तयःशुभाः॥ परा
क्रमंचयुद्धेषुजायतेनिर्भयःपुमान्॥१३॥ रिपवःसंक्षयंयांतिकल्या
णंचोपपद्यतेनंदतेचकुलंपुंसांमहात्म्यंममशृण्वतां॥१४॥ शांतिक
र्मणिसर्वत्रतथादुःस्वप्नदर्शने॥ ग्रहपीडासुचोग्रासुमहात्म्यंशृ
णुयान्मम॥१५॥ उपसर्गाःशमंयांतिग्रहपीडाश्चदारुणाः॥ दुःस्व
प्नंचनृभिर्दृष्टंसुस्वप्नमुपजायते॥१६॥ बालग्रहाभिभूतानांबाला
नांशांतिकारकं॥ संघातभेदेचनृणांमैत्रीकरणमुत्तमं॥१७॥ दुर्वृत्ता

र्नमधेषाणांबलहानिकरंपरं ॥ रक्षोभूतपिशाचानांपठनादेवना
शनं ॥१८॥ सर्वममैतन्महात्म्यंममसंनिधिकारकं ॥ पशुपुष्पार्घधू
पैश्चगंधदीपैस्तथोत्तमैः ॥१९॥ विप्राणांभोजनैर्होमैःप्रोक्षणीयैर
हर्निशं ॥ अन्यैश्चविविधैर्भोगैःप्रदानैर्वत्सरेणया ॥२०॥ प्रीतिर्मेक्रि
यतेसास्मिन्सकृच्चरितेश्रुते ॥ श्रुतंहरतिपापानितथारोग्यंप्र
यच्छति ॥२१॥ रक्षांकरोतिभूतेभ्योजन्मनांकीर्तनंमम ॥ युद्धेषुच
रितंयन्मेदुष्टदैत्यनिबर्हणं ॥२२॥ तस्मिन्छ्रुतेवैरिकृतंभयंपुंसांन
जायते ॥ युष्माभिःस्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः ॥२३॥
ब्रह्मणाचकृतायास्तुप्रयच्छंतुशुभांमति ॥ अरण्येप्रांतरेवापिदा
वाग्निपरिवारितः ॥२४॥ दस्युभिर्वावृतःशून्येगृहीतोवापिशत्रुभिः

सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः ॥२५॥ राज्ञाक्रुद्धेनचाज्ञ
प्तोवध्योबंधगतोपिवा ॥ आघूर्णितोवावातेनस्थितःपोतेमहार्णवे
॥२६॥ पतत्सुचापिशस्त्रेषुसंग्रामेभृशदारुणे ॥ सर्वाबाधासुघोरासु
वेदनाभ्यर्दितोपिवा ॥२७॥ स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात्
ममप्रभावात्सिंहाद्यादस्यवोवैरिणस्तथा ॥२८॥ दूरादेवपलायं
तेस्मरतश्चरितंमम ॥ ऋषिरुवाच ॥ इत्युक्त्वासाभगवतीचंडिका
चंडविक्रमा ॥२९॥ पश्यतामेवदेवानांतत्रैवांतरधीयत ॥ तेपिदे
वानिरातंकाःस्वाधिकारान्यथापुरा ॥३०॥ यज्ञभागभुजःसर्वे
चक्रुर्विनिहतारयः ॥ दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयुधि ॥३१॥
जगद्विध्वंसिनितस्मिन्महोग्रेतुलविक्रमे ॥ निशुंभेचमहावी

वीर्ये हतेषाः पातालमायपु ॥३२॥ एवं भगवती देवी सा नित्यापि पुनः पु
नः ॥ संभूय कुरुते भूप जगतः परिपालनं ॥३३॥ तयैतन्मोह्यते विश्वं से
व विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयछति ॥३४॥ व्या
प्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले महामा
रिस्वरूपया ॥३५॥ सैव काले महामरी सैव सृष्टिर्भवत्यजा ॥ स्थितिं
करोति भूतानां सैव काले सनातनि ॥३६॥ भवकाले नृणां सैव लक्ष्मी
र्वृद्धिप्रदा गृहे सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥३७॥ स्तु
ता संपुजिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददाति वित्तं पुत्रांश्च मतिं
धर्मे गतिं शुभां ॥३८॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे दे
वीमात्म्ये सुंभनिशुंभवधः ॥१२॥ ॥छ॥ ऋषिरुवाच ॥ एतत्ते कथि

तं भूप देवीमहात्म्यमुत्तमं ॥ एवं प्रभावा सा देवी ययेदं धार्यते जगत्
॥ विद्या तथैव क्रियते भगवद्विष्णुमायया ॥ तया त्वमेष वैश्यश्च तथै
वान्ये विवेकिनः ॥२॥ मोह्यंते मोहिताश्चैव मोहमेष्यंति चापरे ॥ तामु
पैहि महाराज शरणं परमेश्वरीं ॥३॥ आराधिता सैव नृणां भोगस्व
र्गापवर्गदा ॥ मार्कंडेय उवाच ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधि
पः ॥ प्रणिपत्य महाभागं तमृषिं संशितव्रतं ॥४॥ निर्विण्णोतिममत्वेन
राज्यापहरणेन च ॥ जगाम सद्यस्तपसे स च वैश्यो महामुने ॥५॥
संदर्शनार्थमंबाया नदीपुलिनसंस्थितः ॥ स च वैश्यस्तपस्तेपे दे
वीसूक्तं परं जपन् ॥६॥ तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीं
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥७॥ निराहारौ यता

होत्रैस्तस्मिन स्कोसमाहितौ ॥ ददतुस्तौ बलिंचैव निजगात्रासृगुक्षितं ॥ ए
वंसमाराधयतोस्त्रिभिर्वर्षैर्यतात्मनः ॥ परितुष्टा जगद्धात्री प्रत्य
क्षं प्राह चंडिका ॥ ९ ॥ देव्युवाच ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुल
नंदन ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते ॥ १० ॥ मार्कंडेय उवा
च ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ अत्रैव च निजं राज्यं ह
तशत्रुबलं बलात् ॥ ११ ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥
ममेत्यहमिति प्राज्ञः संगविच्युतिकारकं ॥ १२ ॥ देव्युवाच ॥ स्वल्पै
रहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ हत्वारिपून स्खलितं तव त
त्र भविष्यति ॥ १३ ॥ मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः सावं
र्णिको नाम मनुर्भवान् भुवि भविष्यति ॥ १४ ॥ वैश्यवर्य त्वया य

श्च वरो स्मत्तोभिवांछितः ॥ तं प्रयच्छामि संसिध्यै तव ज्ञानं भविष्यति ॥
१५ ॥ मार्कंडेय उवाच ॥ इति दत्वा तयोर्देवी यथाभिलषितं वरं ॥ बभू
वांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ १६ ॥ एवं देव्या वरं लब्ध्वा सुर
थः क्षत्रियर्षभः ॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ १७ ॥
इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये सुरथवैश्ययो
र्वरदानं नाम त्रयोदशोध्यायः समाप्तः ॥ श्री ॥ छ ॥ राजोवाच ॥ भगव
न्नवतारा मे चंडिकायास्त्वयोदिताः ॥ एतेषां प्रकृतिं ब्रह्मन् प्रधान्येन
वक्तुमर्हसि ॥ १ ॥ आराध्यं यन्मया देव्याः स्वरूपं येन च द्विजः ॥ विधिना ब्रू
हि सकलं यथावत्प्रणतस्य मे ॥ २ ॥ ऋषिरुवाच ॥ इदं रहस्यं परमम
नाख्येयं प्रचक्षते ॥ भक्तोसीति न मे किंचित्तवावाच्यं नराधिप ३

या

सर्वस्याद्यामहालक्ष्मीस्त्रिगुणासकलेश्वरी ।। लक्ष्यालक्ष्यस्वरूपासा
व्याप्यकृत्स्नंव्यवस्थिता ४ ।। मातुलिंगंगदांखेटंपानपात्रंचबिभ्र
ती ।। नागंयोनिंचलिंगंचबिभ्रतीनृपमूर्द्धनि ।। ५ ।। तप्तकांचनवर्ण
भातप्तकांचनभूषणा ।। शून्यंतदखिलंस्वेनपूरयामासतेजसा ।। ६
शून्यंतदखिलंलोकंविलोक्यपरमेश्वरी ।। बभाररूपमपरंतम
साकेवलेनहि ।। ७ ।। साभिन्नांजनसंकाशादंष्ट्रांचितवरानना ।। वि
शाललोचनानारीबभूवतनुमध्यमा ।। ८ ।। खड्गपात्रशिरःखेटैरलं
कृतचतुर्भुजा ।। कबंधहारंशिरसाबिभ्राणाहिशिरस्रजं ।। ९ ।। सा
प्रोवाचमहालक्ष्मीतामसीप्रमदोत्तमां ।। नामकर्मचमेमातर्देहि
तुभ्यंनमोनमः ।। १० ।। तांप्रोवाचमहालक्ष्मीस्तामसीप्रमदोत्तमां

ददामितवनामानियानिकर्माणितानिते ।। ११ ।। महामायामहा
कालीमहामारीक्षुधातृषा ।। एकवीराकालरात्रिर्निद्रातृष्णादुर
त्यया ।। १२ ।। इमानितवनामानिप्रतिपाद्यानितेमम ।। एभिःकर्म
णितेज्ञात्वायोऽधीतेसोऽश्नुतेसुखं ।। १३ ।। तामित्युक्त्वामहालक्ष्मीः
स्वरूपमपरंनृप ।। सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंदधौ ।। १४ ।।
अक्षमालांकुशधरावीणापुस्तकधारिणी ।। साबभूववरानारी
नामान्यस्यैचसाददौ ।। १५ ।। महाविद्यामहावाणीभारतीवाक्स
रस्वती ।। आर्याब्राह्मीमहाधेनुर्वेदगर्भाचधीश्वरी ।। १६ ।। अथोवा
चमहालक्ष्मीर्महाकालींसरस्वतीं ।। युवांजनयतांदेव्यौमिथुनस्वा
नुरूपतः ।। १७ ।। इत्युक्त्वासामहालक्ष्मीःससर्जमिथुनंस्वयं ।। हिर

एषगर्भौरुचिरौस्त्रीपुंसौकमलासनौ ॥१९॥ ब्रह्माविधिविरिंचेतिधातरित्याहतंनरं ॥ श्रीःपद्मेकमलेलक्ष्मीत्याहमातापवतांस्त्रियं ॥१९॥ महाकालीभारतीचमिथुनेऽसृजतेसह ॥ एतयोरपिरूपाणिनामानिचवदामिते ॥२०॥ नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरं ॥ जनयामासपुरुषंमहाकालीसितांस्त्रियं ॥२१॥ सरुद्रःशंकरःस्थाणुःकपर्दीचत्रिलोचनः ॥ त्रयीविद्याकामधेनुःसात्रिभाषाक्षरास्वरा ॥ सरस्वतीस्त्रियंगौरीकृष्णंचपुरुषंनृप ॥ जनयामासनामानितयोरपिवदामिते ॥२३॥ विष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्द्दनः ॥ उमागौरीसतीचंडीसुंदरीसुभगाशुभा ॥२४॥ एवंयुवतयःसर्वाःपुरुषत्वंप्रपेदिरे ॥ चक्षुष्मंतोहिपश्यंतिनेतरेनद्विजोजनाः ॥२५॥

ब्रह्मणेप्रददौपत्नींसावित्रींनृपसत्तम ॥ रुद्रायगौरींवरदांवासुदेवायचश्रियं ॥२६॥ स्वरयासहसंभूयविरिंचोंडमजीजनत् ॥ बिभेदभगवान्रुद्रस्तद्गौर्यासहवीर्यवान् ॥२७॥ अंडमध्येप्रधानादिकार्यजातमभून्नृप ॥ महाभूतात्मकंसर्वंजगत्स्थावरजंगमं ॥२८॥ पुपोषपालयामासतल्लक्ष्म्यासहकेशवः ॥ महालक्ष्मीर्महाराजसेवसर्वेश्वरी ॥२९॥ निराकाराचसाकारासैवनानाभिधानभृत् ॥ नामांतरैर्निरूप्यैषानाम्नानान्येनकस्यचित् ॥३०॥ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येइतिप्राधानिकंरहस्यंनामचतुर्दशोध्यायः ॥१४॥ ऋषिरुवाच ॥ त्रिगुणातामसीदेवीसात्विकीयात्रिधोदितासशर्वाचंडिकादुर्गा [illegible] भद्राभगवतीतिच ॥१॥ योगनिद्रा

जग

॥ दुर्गा ॥
॥ ४९ ॥

हरेरसा महाकालीतमोगुणा ॥ मधुकैटभनाशार्थं यांतुष्टावांबु
जासन ॥ २ ॥ दशवक्त्रादशभुजादशपादांजनप्रभा ॥ विशालयारा
जमानात्रिंशल्लोचनमालया ॥ ३ ॥ स्फुरद्दशनदंष्ट्रासाभीमरूपा
पिभूमिप ॥ रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रियां ॥ ४ ॥ ख
ड्गदांत्रिशूलंचशंखचक्रंभुशंडिकां ॥ परिघंकार्मुकंशीर्षंनिश्चयो
तद्रुधिरंदधौ ॥ ५ ॥ एषासावैष्णवीमायामहाकालीदुरत्यया ॥ आ
राधितावशीकुर्यात्पूजाकर्तुश्चराचरं ॥ ६ ॥ सर्वदेवशरीरेभ्यायावि
र्भूताऽमितप्रभात्रिगुणासामहालक्ष्मीः साक्षान्महिषमर्द्दनी ॥ ७ ॥
श्वेताननानीलभुजासुश्वेतस्तनमंडला ॥ रक्तमध्यारक्तपादानील
जंघोरुरुन्मदा ॥ ८ ॥ सुचित्रजघनाचित्रमाल्यांबरविभूषणा ॥ चि

॥ राम ॥
॥ ४९ ॥

त्रानुलेपनाकांतिरूपसौभाग्यशालिनी ॥ ९ ॥ अष्टादशभुजापूज्या
सासहस्रभुजासती ॥ आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात्
१० ॥ अक्षमालांचकमलंबाणोसिःकुलिशंगदा ॥ चक्रंत्रिशूलंपरशुः
शंखोघंटाचपाशकः ॥ ११ ॥ शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः
अलंकृतभुजामेभिरायुधैःकमलासनां ॥ १२ ॥ सर्वदेवमयीमीशां
महालक्ष्मीमिमांनृप ॥ पूजयेत्सर्वलोकानांदेवानांप्रभुर्भवे
त् ॥ १३ ॥ गौरीदेहात्समुद्भूतायासत्वैकगुणाश्रया ॥ साक्षात्सरस्व
तीप्रोक्ताशुंभासुरनिवर्हिणी ॥ १४ ॥ दधौचाष्टभुजाबाणमुशलेशू
लचक्रभृत ॥ शंखंघंटांलांगलंचकार्मुकंचविभर्तिया ॥ १५ ॥ ए
षासंपूजिताभक्त्यासर्वज्ञत्वंप्रयच्छति ॥ निशुंभमथनीदेवीशुं

॥दुर्गा॥
॥५०॥

मासुरनिवर्हणी ॥ १६ ॥ इत्युक्त्वा निखिलरूपाणि मूर्तीनां तव पार्थिव ॥ उ
पासनं जगन्मातुः पृथगासां निशामय ॥ १७ ॥ महालक्ष्मीर्यदा पूज्या
महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयं ॥ १८
विरंचिस्वरयोर्मध्ये रुद्रो गौर्यां च दक्षिणे ॥ वामे लक्ष्म्या हृषीकेशः
पुरतो देवतात्रयं ॥ १९ ॥ अष्टादशभुजा मध्ये वामे चास्या दशान
ना ॥ दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ २० ॥ अष्टाद
शभुजा चैषा यदा पूज्या नराधिप ॥ दशानना चाष्टभुजा दक्षिणो
त्तरयोस्तदा ॥ २१ ॥ कालमृत्यु च संपूज्यौ सर्वारिष्टप्रशांतये ॥ यदा
चाष्टभुजा पूज्या शुंभासुरनिवर्हणी ॥ २२ ॥ नवास्याः शक्तयः पू
ज्यास्तदा रुद्रविनायकौ ॥ नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समं

॥राम॥
॥५०॥

र्चयेत् ॥ २३ ॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः ॥ अष्टादश
भुजा चैषा पूज्या महिषमर्दिनी ॥ २४ ॥ महालक्ष्मीर्महाकाली सैव प्रोक्ता
सरस्वती ॥ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ २५ ॥ महिषांतक
री येन पूजिता स जगत्प्रभुः ॥ पूजयेज्जगतां धात्रीं चंडिकां भक्तव
त्सलां ॥ २६ ॥ अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्तथाक्षतैः ॥ धूपैर्दीपै
श्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ २७ ॥ रुधिराक्तेन बलिना मांसेन सुर
या नृप ॥ प्रणामाचमनीयेन चंदनेन सुगंधिना ॥ २८ ॥ सकर्पूरैश्च
तांबूलैर्भक्तिभावसमन्वितैः ॥ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महा
सुरं ॥ २९ ॥ पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ दक्षिणे पुरतः
सिंहं समग्रं धर्ममीश्वरं ॥ ३० ॥ वाहनं पूजयेद्देव्या धृतं येन चराचरं

॥दुर्गा॥ ॥५२॥

ततः कृतांजलिर्भूत्वा स्तुवंतं चरितैरिमां ॥३१॥ एकेन वा मध्यमेन नैके
नेतरयो विहं ॥ श्लोकार्द्धं श्लोकपादं वा श्लोकं वा नुपसत्तम ॥३२॥ च
रितार्द्धं न च जपेत् जयाच्छिद्रिमवाप्नुयात् ॥ स्तोत्रमंत्रैः स्तुवंस्तु त्वाप
दिवा जगदंबिकां ॥३३॥ प्रदक्षिणानमस्कारं कृत्वा मूर्द्धि कृतांज
लिः ॥ क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः ॥३४॥ प्रतिश्लोकं च जु
हुयात्पायसं मधुसर्पिषा ॥ जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शु
भं हविः ॥३५॥ भूयो नाम पदैर्देवीं पूजयेत्सुसमाहितः ॥ प्रयतः प्रांज
लिः प्रह्वः प्रणम्यारोप्य चात्मनि ॥३६॥ सुचिरं भावयेच्चंडिकां तन्मयो
भवेत् ॥ एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीं ॥३७॥ भुक्त्वा भोगान्
यथाकामं देवीसायुज्यमाप्नुयात् ॥ यो न पूजयते नित्यं चंडिकां

पेरीज्ञा

॥राम॥ ॥५१॥

भक्तवत्सलां ॥३८॥ भस्मीकृत्वास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ त
स्मात्पूजय भूपाल सर्वलोकमहेश्वरीं ॥३९॥ यथोक्तेन विधानेन चं
डिकां सुखमाप्स्यसि ॥४०॥ इति वैकृतिकं नाम रहस्यं ॥१५॥
ऋषिरुवाच ॥ नंदा भगवती नाम या भविष्यति नंदजा ॥ सा स्तुता
भक्तितो ध्याता वशी कुर्याज्जगत्त्रयं ॥१॥ कनकोत्तमकांतिः सा सुकां
ति कनकांबरा ॥ देवी कनकवर्णाभा कनकोत्तमभूषणा ॥२॥ क
मलांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिरा कमला लक्ष्मीः सा
श्रीरुक्मांबुजासना ॥३॥ या रक्तदंतिका नाम देवी प्रोक्ता मयानघ
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहं ॥४॥ यच्छ्रुत्वा सर्वपापे
भ्यो मुच्यते नात्र संशयः ॥ रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा

॥दुर्गा॥
॥५२॥

५ रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ रक्ततीक्ष्णनखा रक्तर
सना रक्तदंतिका ॥६॥ पतिं नारीवानुरक्तं देवी भक्तं भजेज्जनं ॥ वसुधे
व विशाला सा सुमेरुयुगलस्तनी ॥७॥ दीर्घौ लंबावतिस्थूलौ तावती
व मनोहरौ ॥ कर्कशावतिकांतौ तौ सर्वानंदपयोनिधी ॥८॥ भक्ता
न्संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥ खड्गं पात्रं च मुशलं लांगलं च
बिभ्रती ॥ सा ॥९॥ आख्याता रक्तचामुंडा देवी योगेश्वरीति च ॥ अनया
व्याप्तमखिलं जगत्स्थावरजंगमं ॥१०॥ इमां यः पूजयेद्भक्त्या स व्याप्नो
ति चराचरं ॥ अधीते य इमं नित्यं रक्तदंत्या वपुःस्तवं ॥११॥ सा तं परि
चरेद्देवी पतिं प्रियमिवांगना ॥ शाकंभरी नीलवर्णा नीलोत्पलवि
लोचना ॥१२॥ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ सुकर्कशसम

मोत्तुंगवृत्तपीनघनस्तनी ॥१३॥ मुष्टिं शिलीमुखापूर्णं कमलं कमला
लया ॥ पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयं ॥१४॥ काम्यानंतर
सैर्युक्तं क्षुत्तृण्मृत्युजरापहं ॥ कार्मुकं च स्फुरत्कांतिं बिभ्रती परमेश्वरी
॥१५॥ शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ उमा गौरी सती चं
डी कालिका सा च पार्वती ॥१६॥ शाकंभरीं स्तुवन्ध्यायन्जपन्सं
पूजयन्नमन् ॥ अक्षय्यमश्नुते शीघ्रमन्नपानामृतानि सः ॥१७॥ भीमा
पि नीलवर्णा च दंष्ट्रादशनभासुरा ॥ विशाललोचना नारी वृत्तपीन
पयोधरी ॥१८॥ चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥ एकवी
रा कालरात्री सैवोक्ता कामदा स्तुता ॥१९॥ तेजोमंडलदुर्धर्षा भ्राम

॥एम॥
॥५२॥

॥ दुर्गा ॥
॥ ५३ ॥

रीचित्रकांतिभृत्‌ ॥ चित्रभ्रमरपाणिः सामहामारीतिगीयते ॥ २० ॥
इत्येता मूर्तयो देव्या याख्याता वसुधाधिप ॥ जगन्मातुश्चंडिकायाः
कीर्त्तिताः कामधेनवः ॥ २१ ॥ इदं रहस्यं परमं न वाच्यं कस्यचित्‌ त्वया
॥ व्याख्यानं दिव्यमूर्त्तीनां योधितेसोभ्युते सुखं ॥ २२ ॥ देव्याः पिनि
र्मोज्ञानी देवताध्यानमाश्रितः भाविता च महायोगी परं धाम मना
लनं ॥ २३ ॥ इमां सप्तशती चंडी यः पठेच्छ्रयतो नरः ॥ सर्वान्कामान
वाप्नोति शतवर्षं स जीवति ॥ २४ ॥ यावज्जन्मकृतं पापं ब्रह्महत्
यापुरःसरं ॥ पठनात्‌ सकृदेवस्य स्यपं पातिन संशयः ॥ २५ ॥
इति श्री देव्या मूर्त्तिरहस्यं नाम समाप्त ॥ २६ ॥ छ ॥ छ ॥ छ ॥

॥ लम ॥
॥ ५३ ॥